Specially designed for Matric and College students.

SUBHASHITARATNAMALA.

NO. 2.

WITH ENGLISH AND MARATHI NOTES

BY

KESHAV GANESH CHIPLONKAR,
AUTHOR OF COMPANION TO ARITHMETIC,
AND GEOMETRICAL RIDERS.

(ALL RIGHTS RESERVED.)

SECOND EDITION.
(THOROUGHLY REVISED AND ENLARGED.)

Printed by M. N. Dixit at the Shri Vyankateshwar Press, Branch
KOLHAPUR.

1912.

Price 10 annas.

शिक्षकांस व पालकांस विनंति.

या पिढींतील प्रत्येक सुशिक्षित मनुष्याला उपदेशपर, खुबी-
रंजक असे किती तरी श्लोक मुखोद्गत येत असत, व त्यांचा
यें योग्यवेळीं उपयोग करून, ऐकणारे मंडळीना ते
द देत असत, याचा अनुभव आजच्या पिढींतील सर्वांना
कांहींना आहे यांत शंका नाहीं. अलीकडील मुलेंही अशींच
ीत या हेतूनें विद्यार्थ्यांकारितां मी एक लहानशी
ांची माला तयार केली. तिचा उपयोग बऱ्याच रसिक
ल्यामुळें सर्व बाजूंनीं सुधारून, वाढविलेली अशी ही दुसरी
ढण्याचा सुयोग लवकरच आला याबद्दल आनंद होत आहे.
, इंग्रजी शाळांतील शिक्षकांना, पालकांना व इतर सभ्य
तकीच नम्र विनंति आहे कीं, त्यांनीं मुलांना रोज या पुस्त-
ल्या भागांतील निदान २।३ श्लोकांचा अर्थ सांगून, ते त्यांना
ास सांगावें. स्वतः आपणही रोज सकाळीं पहिल्या भा-
१० पानें, व रात्रीं भोजनोत्तर दुसऱ्या भागांतील १०।२०
ानें वाचण्याचा क्रम ठेवावा. मोठ्यानें वाचण्याचें कारण
, त्याचे योगानें स्वतःचे डोक्याला इतर दगदगीमुळें झालेला
होऊन घरांतील इतर माणसांनाही ते श्लोक ऐकून फायदा होईल.
श्लील श्लोक बिलकुल न घालतां, **धर्म, नीति, राजभक्ति
आरोग्य** इत्यादि महत्वाचे विषयांसंबंधीं बहुमोल श्लोकरत्नेंच
मालांमध्यें ग्रथित केलीं असल्यामुळें सर्वांच्याच व विशेषतः
ठाला इतर दागिन्यांपेक्षां याच माला अधिक शोभा देतील.

To

His Highness

SHRI

SHAHU CHHATRAPATI MAHARAJA

G. C. S. I., G. C. V. O., M. R. A. S., L. L. D.,

THE MAHARAJA OF

KOLHAPUR

This small work is with permisson dedicated as a tribute of profound respect and admiration, by the

COMPILER.

अनुक्रमणिका.

———o:o———

	पृष्ठम्
प्रथमावलिः (Verses 400, for st. VII)	१
द्वितीयावलिः (Verses 750, for college students)	४७
पदपदविमर्शिणी टीका (Notes–English & Marathi)	१३९
शीपत्रम्	१९९

———

वाचट-सुभाव-सागर.

सुभाषितरत्नमाला ।

(द्वितीया)

प्रथमावलिः ।

राज्यं येन पटान्तलग्नतृणकं त्यक्तं गुरोराज्ञया
पाथेयं परिगृह्य कार्मुकवरं घोरं वनं प्रस्थितः ।
स्वाधीनः शशिमौलिचापविषये प्राप्तो न वै विक्रियां
पायाद्वः स बिभीषणाग्रजनिहा रामाभिधानो हरिः ॥१॥
कर्तुमकर्तुं शक्तः, सकलं जगदेतदन्यथा कर्तुम् ।
यस्तं विहाय रामं, कामं मा धेहि मानसमन्यस्मिन् ॥२॥
येषां श्रीमद्यशोदासुतपदकमले नास्ति भक्तिर्नराणां
येषामाभीरकन्याप्रियगुणकथने नानुरक्ता रसज्ञा ।
येषां श्रीकृष्णलीलालालितगुणरसे सादरौ नैव कर्णौ
धिक् तान्, धिक् तान्, धिगेतान् कथयति सततं कीर्तनस्थो मृदंगः॥३॥
कृष्ण, त्वदीयपदपङ्कजपञ्जरान्ते अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते॥४॥
भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे,
मायामोहौ क्षयमुपगतौ नष्टसंदेहवृत्तेः ।

शुद्धातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः, को निषेधः ॥५॥
शरीरे जर्जरीभूते, व्याधिग्रस्ते कलेवरे ।
औषधं जान्हवीतोयं, वैद्यो नारायणो हरिः ॥६॥
वेदान्तवाक्येषु सदा रमन्तो, भिक्षान्नमात्रेण च तुष्टिमन्तः ।
विशोकमन्तःकरणे रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥७॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥८॥
प्रतिक्षणे मृत्युहरं निजायुर्न वेद मूढो विषयेषु सक्तः ।
भेको यथा व्यालमुखे प्रविष्टः स मक्षिकां द्वेष्टि विनष्टबुद्धिः ॥९॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥१०॥
अग्निर्देवो द्विजातीनां, मुनीनां हृदि दैवतम् ।
प्रतिमा स्वल्पबुद्धीनां, सर्वत्र समदर्शिनाम् ॥११॥
ब्रह्म सत्यं, जगन्मिथ्या, जीवो ब्रह्मैव नापरः ।
अनेन वेद्यं सच्छास्त्रमिति वेदान्तडिण्डिमः ॥१२॥
निराशर्यतचित्तात्मा, त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥१३॥
शिवाय विष्णुरूपाय, शिवरूपाय विष्णवे ।
शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ॥१४॥
ज्ञानं तत्त्वार्थसंबोधः, शमश्चित्तप्रशांतता ।

दया सर्वसुखैषित्वमार्जवं समचित्तता ॥१५॥
स्वधर्मे स्थिरता स्थैर्यं, धर्ममिन्द्रियनिग्रहः ।
स्नानं मनोमलत्यागो, दानं वै भूतरक्षणम् ॥१६॥
सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥१७॥
शतं विहाय भोक्तव्यं, सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं, कोटिं त्यक्त्वा हरिं भजेत् ॥१८॥
जयोऽस्तु पाण्डुपुत्राणां येषां पक्षे जनार्दनः ।
यतः कृष्णस्ततो धर्मो, यतो धर्मस्ततो जयः ॥१९॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥२०॥
मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना कुर्यात्सिद्धिर्भवति तादृशी ॥२१॥
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाज्जर्जरभूते देहे वार्तां कोऽपि न पृच्छति गेहे ॥२२॥
का तव कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः ॥२३॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि सत्तत्वम् ॥२४॥
येन केन प्रकारेण यस्य कस्यापि देहिनः ।
संतोषं जनयेत्प्राज्ञस्तदेवेश्वरपूजनम् ॥२५॥

र्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२६॥
सुखितोऽस्मि सुखापन्ने, दुःखितो दुःखिते जने ।
सर्वस्य प्रियमित्रं च, तेन जीवाम्यनामयः ॥२७॥
करोमीशोऽपि नाक्रान्ति, परतापेन खेदवान् ।
दरिद्रोऽपि न वाञ्छामि, तेन जीवाम्यनामयः ॥२८॥
अयं बन्धुः, परश्चायं, ममायमयन्यतः ।
इति ब्रह्मन्न जानामि, तेन जीवाम्यनामयः ॥२९॥
जरामरणदुःखेषु राज्यलाभसुखेषु च ।
न बिभेमि, न हृष्यामि, तेन जीवाम्यनामयः ॥३०॥
किमद्य मम संपन्नं, प्रातर्वा भविता पुनः।
इति चिन्ताज्वरो नास्ति, तेन जीवाम्यनामयः ॥३१॥

सुभाषितमयैर्द्रव्यैः संग्रहं न करोति यः ।
रा तु प्रस्तावयज्ञेषु किं प्रदास्यति दक्षिणाम् ॥३२॥
सुभाषितेन, गीतेन, युवतीनां च लीलया ।
यस्य न द्रवते चित्तं स वै मुक्तोऽथवा पशुः ॥३३॥
नायं प्रयाति विकृतिं निरसो न यः स्पा-
न्न क्षीयते बहुजनैर्नितरां निपीतो ।
जाड्यं निहन्ति, रुचिमेति, करोति तृप्तिं
नूनं सुभाषितरसोऽन्यरसातिशायी ॥३४॥
खेनं चापि सुभाषितेन रमते स्वीयं मनः सर्वदा ।

श्रुत्वान्यस्य सुभाषितं खलु मनः श्रोतुं पुनर्वाञ्छति ॥
अज्ञाज्ञानवतोऽप्यनेन हि वशीकर्तुं समर्थो भवेत् ।
कर्तव्यो हि सुभाषितस्य मनुजैरावश्यकः संग्रहः ॥३५॥

प्रथमे नार्जिता **विद्या**, द्वितीये नार्जितं धनम् ।
तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति ॥३६॥
सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति त्रयो जनाः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥३७॥
विषादप्यमृतं ग्राह्यममेध्यादपि कांचनम् ।
नीचादप्युत्तमां विद्यां, स्त्रीरत्नं दुष्कुलादपि ॥३८॥
मातेव रक्षति, पितेव हिते नियुंक्ते
कान्तेव चापि रमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति, वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या ॥३९॥
क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।
क्षणत्यागे कुतो विद्या, कणत्यागे कुतो धनम् ॥४०॥
स्वच्छन्दत्वं, धनार्थित्वं, प्रेमभावोऽथ, भोगिता ।
अविनीतत्वमालस्यं, विद्याविघ्नकराणि षट् ॥४१॥
न च विद्यासमो बन्धुर्न च व्याधिसमो रिपुः ।
न चापत्यसमः स्नेही, **न च धर्मो दयापरः** ॥४२॥
वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।

भवति च पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥४३॥
पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥४४॥
शूरश्च कृतविद्यश्च रूपवत्यश्च योषितः ।
यत्र यत्र गमिष्यन्ति तत्र तत्र कृतादराः ॥४५॥
तावद्विद्यानवद्या, गुणगणमहिमा, रूपसंपत्तिशौर्ये
स्वस्थाने सर्वशोभा, परगुणकथने वाक्पटुस्तावदेव ।
यावत्पाकाकुलाभिः स्वगृहयुवतिभिः प्रेषितापत्यवक्त्रात्
हे बाबा, नास्ति तैलं न च लवणमपीत्यादिचाचां प्रचारः ॥४६॥
एकं हन्यान्न हन्याद्वा शरो मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥४७॥
नरस्याभरणं रूपं, रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं, ज्ञानस्याभरणं क्षमा ॥४८॥
यथैन्धांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥४९॥
शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहताश्च नितरां सुहता भवन्ति ।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकं
प्रज्ञा कुलं च विभवं च यशश्च हन्ति ॥५०॥
जडास्तपोभिः शमयन्ति देहं, बुधा मनः सर्वविकारहेतुम् ।

श्वा मुक्तमस्त्रं दशतीह कोपान्मोक्तारमुद्दिश्य हिनस्ति सिंहः ॥५१॥
मीनः स्नानरतः, फणी पवनभुङ्, मेषस्तु पर्णाशनो
नीराशः खलु चातकः, प्रतिदिनं शेते बिले मूषकः ।
भस्मोद्धूलनतत्परः खलु खरो, ध्यानाधिरूढो बकः
सर्वे किं ननु यान्ति मोक्षपदवीं, **ज्ञानप्रधानं तपः** ॥५२॥
यथा खरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य ।
तथा हि विप्रः श्रुतिशास्त्रपूर्णो, **ज्ञानेन हीनः पशुभिः समानः** ५३
दानेन पाणिर्न तु कंकणेन, स्नानेन शुद्धिर्न तु चन्दनेन ।
मानेन तृप्तिर्न तु भोजनेन, ज्ञानेन मुक्तिर्न तु मुण्डनेन ॥५४॥
गीर्भिर्गुरूणां परुषाक्षराभिस्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो वसन्ति ॥५५॥
मतिरेव बलाद्गरीयसी यदभावे करिणामियं दशा ।
इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन् ॥५६॥

सन्त एव सतां नित्यमापदुद्धरणक्षमाः ।
गजानां पङ्कमग्नानां गजा एव धुरंधराः ॥५७॥
सुजनो न याति वैरं परहितकार्ये विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥५८॥
धवलयति समग्रं चन्द्रमा जीवलोकं
किमिति निजकलङ्कं नात्मसंस्थं प्रमार्ष्टि ।
भवति विदितमेतत्प्रायशः सज्जनानां
परहितनिरतानामादरो नात्मकार्ये ॥५९॥

ये दीनेषु दयालवः, स्पृशति यानल्पोऽपि न श्रीमदो
व्यग्रा ये च परोपकारकरणे, हृष्यन्ति ये याचिताः ।
स्वस्थाः सन्ति च यौवनोन्मदमहाव्याधिप्रकोपेऽपि ये
तैः स्तम्भैरिव सुस्थिरैः किल भरक्रान्ता धरा धार्यते ॥६०॥
सुजनं व्यजनं मन्ये चारुवंशसमुद्भवम् ।
आत्मानं च परिभ्राम्य परतापनिवारणम् ॥६१॥
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं
त्वसंतो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥६२॥
अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।
अम्भोनिधिर्वहति दुस्तरवाडवाग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥६३॥
असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः, सतां सङ्गो, गङ्गाम्भः, शम्भुसेवनम् ॥६४॥
सत्संगाद्भवति हि साधुता खलानां
साधूनां न हि खलसंगमात्खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गन्धं न हि कुसुमानि धारयन्ति ॥६५॥
गंगेवाघविनाशिनी जनमनःसन्तोषवच्चन्द्रिका

तीक्ष्णांशोरपि सत्प्रभेव जगदज्ञानांधकारापहा ।
छायेवाखिलतापनाशनकरी, स्वर्धेनुवत्कामदा
पुण्यैरेव हि लभ्यते सुकृतिभिः सत्संगतिर्दुर्लभा ॥६६॥
गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः ॥६७॥
महानुभावसंसर्गः कस्य नोन्नतिकारकः ।
रथ्याम्बु जाह्नवीसंगात् त्रिदशैरपि वन्द्यते ॥६८॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः, शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥६९॥
केनाञ्जितानि नयनानि मृगांगनानां
को वा करोति रुचिरांगरुहान् मयूरान् ।
कश्चोत्पलेषु दलसन्निचयं करोति
को वा करोति विनयं कुलजेषु पुंसु ॥७०॥
मा भूत्सज्जनयोगो, यदि योगो मा पुनः स्नेहः ।
स्नेहो यदि विरहो मा, यदि विरहो जीविताशा का ॥७१॥
अनुकुरुतः खलसुजनावग्निमृद्भाण्डयोः सूच्याः ।
विदधाति रंध्रमेको, मुद्गमस्यापरोऽपि विदधाति ॥७२॥
विगृहीतः पदाक्रान्तो भूयोभूयश्च खण्डितः ।
माधुर्यमेवावहति सुश्लोक इव सज्जनः ॥७३॥

तृष्णां छिन्दि, भज क्षमां, जहि मदं, पापे रतिं मा कृथाः ।
सत्यं ब्रूह्यनुयाहि साधुपदवीं, सेवस्व विद्वज्जनान् ॥
मान्यान्मानय, विद्विष्वप्यनुनय, प्रच्छादय स्वान्गुणान् ।
कीर्तिं पालय, दुःखिते कुरु दयामेतत्सतां लक्षणम् ॥७४॥
पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥७५॥
किमत्र चित्रं यत्सन्तः परानुग्रहतत्पराः ।
न हि स्वदेहशैत्याय जायते चन्दनद्रुमाः ॥७६॥
मूलैर्भुजङ्गैः, शिखरैर्विहङ्गैः, शाखाः प्लवङ्गैः, कुसुमानि भृङ्गैः ।
आश्चर्यमेतत्खलु चन्दनस्य, **परोपकाराय सतां विभूतयः**॥७७॥
रत्नाकरः किं कुरुते स्वरत्नैर्विन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डखण्डैर्मलयाचलः किं, **परोपकाराय सतां विभूतयः**॥७८॥
अधमा धनमिच्छन्ति, धनमानौ च मध्यमाः ।
उत्तमा मानमिच्छन्ति, **मानो हि महतां धनम्** ॥७९॥
अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥८०॥
उत्तमा आत्मना ख्याताः, पित्रा ख्याताश्च मध्यमाः ।
मातुलेनाधमाः ख्याताः, श्वशुरेणाधमाधमाः ॥८१॥
उत्तमे तु क्षणं कोपो, मध्यमे घटिकाद्वयम् ।

अधमे स्यादहोरात्रं; चाण्डाले मरणान्तिकः ॥८२॥
सह परिजनेन विलसति धीरो, गहनानि तरति पुनरेकः ।
विषमेकेन निपीतं त्रिपुरजिता, सह सुरैरमृतम् ॥८३॥
तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं महान्महत्स्वेव करोति विक्रमम् ॥८४॥
विज्ञेतव्या लङ्का, चरणतरणीयो जलनिधिः:
विपक्षः पौलस्त्यो, रणभुवि सहायाश्च कपयः ।
तथाप्येको रामः सकलमजयद्राक्षसकुलं ।
क्रियासिद्धिः सत्त्वे वसति महतां, नोपकरणे ॥८५॥
घटो जन्मस्थानं, मृगपरिजनो, भूर्जवसनं
वने वासः, कन्दैरशनमपि दुस्थं वपुरिदम् ।
अगस्त्यः पाथोधिं यदकृत कराम्भोजकुहरे
क्रियासिद्धिः सत्त्वे वसति महतां, नोपकरणे ॥८६॥
विपक्षः श्रीकण्ठो, जडतनुरमात्यः शशधरो
वसन्तः सामन्तः, कुसुममिषवः, सैन्यमबलाः ।
तथापि त्रैलोक्यं जयति मदनो देहरहितः
क्रियासिद्धिः सत्त्वे वसति महतां, नोपकरणे ॥८७॥
रथस्यैकं चक्रं, भुजगयमिताः सप्त तुरगा
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां, नोपकरणे ॥८८॥

दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः, शीतः कृष्णायते करम् ॥८९॥
मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु सन्धेयः ॥९०॥
अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः ।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥९१॥
विशिखव्यालयोरन्यवर्णाभ्यां यो विनिर्मितः ।
परस्य हरति प्राणान्नैतच्चित्रं, कुलोचितम् ॥९२॥
परिशुद्धामपि वृत्तिं समाश्रितो दुर्जनः परान्व्यथते ।
पवनाशिनोऽपि भुजगाः परपरितापं न मुञ्चन्ति ॥९३॥
यस्मिन्वंशे समुत्पन्नस्तमेव निजचेष्टितैः ।
दूषयत्यविरेणैव, घृणकीट इवाधमः ॥२४॥
अमित्रं कुरुते मित्रं, मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं, तमाहुर्मूढचेतसम् ॥९५॥
अनाहूतः प्रविशति, अपृष्टो बहुभाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥९६॥
गुणायन्ते दोषाः सुजनवदने, दुर्जनमुखे
गुणा दोषायन्ते, किमिति जगतां विस्मयपदम् ।
यथा जीमूतोऽयं लवणजलधेर्वारि मधुरं,
फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम् ॥९७॥
दुर्वृत्तसंगतिरनर्थपरंपराया हेतुः सतां भवति, किं वचनीयमेतत् ।

लंकेश्वरो हरति दाशरथेः कलत्रं, प्राप्नोति बंधमथ दक्षिणसिंधुराजः॥९८
तक्षकस्य विषं दन्ते, मक्षिकायाश्च मस्तके ।
वृश्चिकस्य विषं पुच्छे, सर्वाङ्गे दुर्जनस्य च ॥९९॥
दुर्जनस्य विशिष्टत्वं परोपद्रवकारणम् ।
उपोषितस्य व्याघ्रस्य पारणं पशुमारणम् ॥१००॥
ब्रह्मघ्ने च सुरापे च चौरेभग्नव्रते शवे ।
निष्कृतिर्विहिता सद्भिः, कृतघ्ने नास्ति निष्कृतिः ॥१०१॥
हालाहलं खलु पिपासति कौतुकेन,
कालानलं परिचुचुंबिषति प्रकामम् ।
व्यालाधिपं च यतते परिरब्धुमद्धा,
यो दुर्जनं वशयितुं तनुते मनीषाम् ॥१०२॥
मुखं पद्मदलाकारं, वाणी चन्दनशीतला ।
हृदयं कर्तरीतुल्यं, त्रिविधं धूर्तलक्षणम् ॥१०३॥
परस्परागि मर्माणि ये वदन्ति नराधमाः ।
परस्परं क्षयं यान्ति वल्मीकोदरसर्पवत् ॥१०४॥
उपकारोऽपि नीचानामपकारो हि जायते ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥१०५॥
कृतमपि महोपकारं पय इव पीत्वा निरातंकः ।
प्रत्युत हन्तुं यतते काकोदरसोदरः खलो जगति ॥१०६॥
त्यक्त्वापि निजप्राणान्परहितविघ्नं खलः करोत्येव ।
कवले पतिता सद्यो वमयति मक्षिकाऽन्नभोक्तारम् ॥१०७॥

संवर्धितोऽपि भुजगः पयसा न वश्य-
स्तत्पालकानपि निहन्ति बलेन सिंहः ।
दुष्टः परैरुपकृतस्तदनिष्टकारी,
विश्वासलेश इह नैव बुधैर्विधेयः ॥१०८॥
गुणिनां गुणेषु सत्स्वपि, पिशुनजनो दोषमात्रमादत्ते ।
पुष्पे फले विरागी क्रमेलकः कण्टकौघमिव ॥१०९
परिपूर्णेऽपि तटाके काकः कुम्भोदकं पिबति ।
अनुकूलेऽपि कलत्रे नीचः परदारलम्पटो भवति ॥११०॥
सर्वलोकपरितोषकारिणि स्वर्धुनीविमलवारिणि स्थिते ।
पूतिगन्धवति पल्वलोदके सूकरः सुखमतीव मन्यते ॥१११॥
अहमेव गुरुः सुदारुणानामिति हालाहल मास्म तात दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥११२॥
न विना परिवादेन रमते दुर्जनो जनः ।
काकः सर्वरसान् भुङ्क्ते विनाऽमेध्यं न तृप्यति ॥११३॥
सर्पः क्रूरः खलः क्रूरः, सर्पात्क्रूरतरः खलः ।
मन्त्रेण शाम्यते सर्पो, न खलः शाम्यते कदा ॥११४॥
विषधरतोऽप्यतिविषमः खल इति, न मृषा वदन्ति विद्वांसः ।
यदयं नकुलद्वेषी, सुकुलद्वेषी पुनः पिशुनः ॥११५॥
दह्यमानाः सुतीक्ष्णेन नीचाः परयशोग्निना ।
अशक्तास्तत्पदं गन्तुं, ततो निन्दां प्रकुर्वते ॥११६॥

दैवं फलति सर्वत्र, न विद्या न च पौरुषम् ।
समुद्रमथनाल्लेभे हरिर्लक्ष्मीं, हरो विषम् ॥११७॥
मा धाव मा धाव विनैव दैवं, नो धावनं साधनमस्ति लक्ष्म्याः ।
चेद्धावनं साधनमस्ति लक्ष्म्याः, श्वा धावमानो न लभेत लक्ष्मीम्॥११८॥
प्राप्तव्यमर्थं लभते मनुष्यो, देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि, न विस्मयो मे, यदस्मदीयं न हि तत्परेषाम्॥११९॥
न केवलं मनुष्येषु, दैवं देवेष्वपि प्रभुः ।
सति मित्रे धनाध्यक्षे चर्मप्रावरणो हरः ॥१२०॥
भगवन्तौ जगन्नेत्रे सूर्याचन्द्रमसावपि ।
वश्य गच्छत एवास्तं, नियतिः केन लङ्घ्यते ॥१२१॥
किं करोति नरः प्राज्ञः, शूरो वाप्यथ पण्डितः ।
दैवं यस्य च्छलान्वेषि करोति विफलाः क्रियाः ॥१२२॥
हरिणापि, हरेणापि, ब्रह्मणापि, सुरैरपि ।
ललाटलिखिता रेखा परिमार्ष्टुं न शक्यते ॥१२३॥
कैवर्तकर्कशकरग्रहणच्युतोऽपि
जालान्तरे निपतितः शफरो धराकः ।
दैवात्ततो विगलितो गिलितो बकेन
वक्त्रे विधौ, वद, कथं व्यवसायसिद्धिः ॥१२४॥
कर्मणो हि प्रधानत्वं, किं कुर्वन्ति शुभा ग्रहाः ।
वसिष्ठदत्तलग्नश्च रामः किं भ्रमते वनम् ॥१२५॥
यस्मिन्काले, यदा देशे, यन्मुहूर्ते च यद्दिने ।

हानिर्मृत्युर्यशो लाभस्तत्तत्काले भविष्यति ॥१२६॥
विवाहोऽर्थश्च मरणमन्नं जननमेव च ।
कण्ठे बध्वा दृढं सूत्रं यत्रस्थं तत्र नीयते ॥१२७॥
यः सुन्दरस्तद्वनिता कुरूपा, या सुन्दरी सा पतिरूपहीना ।
यत्रोभयं तत्र दरिद्रता च, विधेर्विचित्राणि विचेष्टितानि ॥१२८॥
त्रिलोकेशः शार्ङ्गी शबरशरलक्षत्वमगम-
द्विधाता लोकानामलभत शिरःकृन्तनविधिम् ।
प्रयातौ तौ राहोर्दिनकरशशाङ्कौ कवलतां
प्रभुर्नग्नः शम्भुः, शिरसि लिखितं लङ्घयति कः ॥१२९॥
स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद्ग्रस्यते राहुणासौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥१३०॥
भाग्यवन्तं प्रसूयेथा, मा शूरं, मा च पण्डितम् ।
शूराश्च कृतविद्याश्च वने तिष्ठन्ति मत्सुताः ॥१३१॥
न विद्या कारणं पुसां, दैवमेवात्र कारणम् ।
पाषाणस्य कुतो विद्या, केन देवत्वमाप्नुयात् ॥१३२॥
प्राप्तव्यमर्थं लभते मनुष्यो, देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि, न विस्मयो मे, यदस्मदीयं न हि तत्परेषाम्॥१३३॥
पूर्वदत्तेषु या विद्या, पूर्वदत्तेषु यद्धनम् ।
पूर्वदत्तेषु या भार्या, अग्रे धावति धावति ॥१३४॥

कर्तव्योऽप्याश्रयः श्रेयान्, फलं भाग्यानुसारतः ।
नीलकण्ठस्य कण्ठेऽपि वासुकिर्वायुभक्षकः ॥१३५॥
कुमुदवनमपश्रि, श्रीमदम्भोजखण्डं,
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिरोचिर्याति शीतांशुरस्तं, ॥म
हतविधिललितानां हन्त चित्रो विपाकः ॥१३६॥
गीतं कोकिल ते मुदा रसविदः शृण्वन्ति कर्णामृतं
नो किंचिद्वितरन्ति ते, तरुदलैरेव स्वयं जीवसि ।
कर्णायुर्हरमुद्विरन्ति विरुतं काकास्तु तेभ्यो बलिं
प्रज्ञा एव दिशन्ति, हन्त धिगिदं वक्रं विधेः क्रीडितम् ॥१३७॥
वने विशुद्धामपि जानकीं तां
जहौ वनान्ते किल रामचन्द्रः ।
सा किं न शुद्धा, स च किं न वेत्ता,
बलीयसी केवलमीश्वरेच्छा ॥१३८॥
कर्मायत्तं फलं पुसां, बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥१३९॥
विपत्तौ किं विषादेन, संपत्तौ हर्षणेन किम् ।
भवितव्यं भवत्येव, कर्मणो गहना गतिः ॥१४०॥
मज्जत्वम्भसि, यातु मेरुशिखरं, शत्रुं जयत्वाहवे
वाणिज्यं कृषिसेवनादिसकलं सर्वाः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं

नाभाव्यं भवतीह कर्मवशतो, भाव्यस्य वा शं कुतः ॥१४१॥
अवश्यं भाविनो भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य, महाहिशयनं हरेः ॥१४२॥
निमग्नस्य पयोराशौ, पर्वतात्पतितस्य च ।
तक्षकेणापि दष्टस्य आयुर्मामणि रक्षति ॥१४३॥
आसाद्यापि महोदधिं न वितृषो जातो जलैर्वाडवो
मेघं प्राप्य न चातकोऽपि, चरणौ भानुं न लेभेऽरुणः ।
चन्द्रः शंकरशेखरेऽपि निवसन्पक्षक्षये क्षीयते
प्रायः सज्जनसंगतौ हि लभते दैवानुरूपं फलम् ॥१४४॥
सत्यं सत्यं मनोर्वाक्यं, नादत्तमुपतिष्ठते ।
अम्बुभिः पूरिता पृथ्वी चातकस्य मरुस्थली ॥१४५॥
खनन्तु सप्तपातालं, भ्रमन्त्वाकाशमण्डले ।
धावन्तु सकलां पृथ्वीं, नादत्तमुपतिष्ठति ॥१४६॥
रङ्कं करोति राजानं, राजानं रङ्कमेव च ।
धनिनं निर्धनं चैव, निर्धनं धनिनं तथा ॥१४७॥
लब्धं जन्म सह श्रिया, स्वयमपि त्रैलोक्यभूषाकरः
स्थित्यर्थं परमेश्वराभ्युपगतस्तेनापि मूर्ध्ना धृतः ।
वृद्धिं शीतकरस्तथापि न गतः, क्षीणः परं प्रत्युत
प्रायः प्राक्तनमेव कर्म बलवत् कः कस्य कर्तुं क्षमः ॥१४८॥
कांश्चित्तुच्छयति, प्रपूरयति वा, कांश्चिन्नयत्युन्नतिं
कांश्चित्पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान् ।

अन्योन्यप्रतिपक्षसंहतिमिमां लोकस्थितिं बोधय-
न्नेष क्रीडति कूपयंत्रघटिकान्यायप्रसक्तो विधिः ॥१४९॥

कालः पचति भूतानि, कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति, **कालो हि दुरतिक्रमः** ॥१५०॥
पुरंदरसहस्राणि चक्रवर्तिशतानि च ।
निर्वापितानि कालेन, **कालो हि दुरतिक्रमः** ॥१५१॥
सा रम्या नगरी, महान्स नृपतिः, सामन्तचक्रं च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्च चन्द्रबिम्बाननाः ।
उन्मत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥१५२॥
उदुम्बरफलानीव ब्रह्माण्डान्यत्ति यः सदा ।
सर्वगर्वापहः कालस्तस्य के मशका वयम् ॥१५३॥
अप्सु प्लवन्ते पाषाणा, मानुषा घ्नन्ति राक्षसान् ।
कपयः कर्म कुर्वन्ति, **कालस्य कुटिला गतिः** ॥१५४॥
अपस्तरन्ति पाषाणा, ह्यनुघ्नन्ति हि राक्षसान् ।
कपयः कर्म कुर्वन्ति, **कालस्य कुटिला गतिः** ॥१५५॥
मातुलो यस्य कृष्णश्च, पिता यस्य धनंजयः ।
अभिमन्योर्गतः प्राणः, कालस्य कुटिला गतिः ॥१५६॥
गोविन्दो मातुलो यस्य, पिता यस्य धनंजयः ।
अभिमन्यू रणे शेते, नियतिः केन वार्यते ॥१५७॥

कालः समविषमकरः, परिभवसंमानकारकः कालः ।
कालः करोति पुरुषं दातारं याचितारं च ॥१५८॥
प्राज्ञो वा यदि वा मूर्खः सधनो निर्धनोऽपि वा ।
सर्वे कालवशं यान्ति शुभाशुभसमन्विताः ॥१५९॥

विहाय **पौरुषं** यो हि दैवमेवावलम्बते ।
प्रासादसिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसाः ॥१६०॥
यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम् ।
तथा पुरुषकारेण विना, दैवं न सिध्यति ॥१६१॥
न दैवमिति संचिन्त्य त्यजेदुद्यममात्मनः ।
अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमिच्छति ॥१६२॥
शरीरनिरपेक्षस्य, दक्षस्य, व्यवसायिनः ।
बुद्धिप्रारब्धकार्यस्य नास्ति किंचन दुष्करम् ॥१६३॥
साधूपदिष्टमार्गेण यन्मनोऽङ्गविचेष्टितम् ।
तत्पौरुषं तत्सफलमन्यदुन्मत्तचेष्टितम् ॥१६४॥
पौरुषादृश्यते सिद्धिः, पौरुषाद्धीमतां क्रमः ।
दैवमाश्वासनामात्रं दुःखे पेलवबुद्धिषु ॥१६५॥
दैवमेवेह चेत्कर्तृ, पुंसः किमिव चेष्टया ।
स्नानदानासनोच्चारान्दैवमेव करिष्यति ॥१६६॥
मूढैः प्रकल्पितं दैवं, तत्परास्ते क्षयं गताः ।
प्राज्ञास्तु पुरुषार्थेन पदमुत्तममास्थिताः ॥१६७॥

ये शूरा, ये च विक्रान्ता, ये प्राज्ञा, ये च पण्डिताः ।
तैस्तैः किमिव लोकेऽस्मिन्वद दैवं प्रतीक्ष्यते ॥१६८॥
कालबिद्भिर्विनिर्णीता यस्यातिचिरजीविता ।
स चेज्जीवति संच्छिन्नशिरास्तद्दैवमुत्तमम् ॥१६९॥
कालविद्भिर्विनिर्णीतं पाण्डित्यं यस्य, राघव ।
अनध्यापित एवासौ तज्ज्ञश्चेद्दैवमुत्तमम् ॥१७०॥
विश्वामित्रेण मुनिना दैवमुत्सृज्य दूरतः ।
पौरुषेणैव संप्राप्तं ब्राह्मण्यं, राम, नान्यथा ॥१७१॥
सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् ।
दैवायत्तं कुले जन्म, मदायत्तं तु पौरुषम् ॥१७२॥
किं कुलेन विशालेन, शीलमेवात्र कारणम् ।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥१७३॥
व्रजत्यधः प्रयात्युच्चैर्नरः स्वैरेव चेष्टितैः ।
अधः कूपस्य खनक, उर्ध्वं प्रासादकारकः ॥१७४॥
कौशेयं कृमिजं, सुवर्णमुपलादिन्दीवरं गोमयात्
पङ्कात्तामरसं, शशाङ्क उदधेर्गोपित्ततो रोचनम् ।
काष्ठादग्निरहेः फणादपि मणिर्दूर्वापि गोरोमतः
प्राकाश्यं स्वगुणोदयेन गुणिनो यास्यन्ति, किं जन्मना ॥१७५॥

न्यायप्रवृत्तो **नृपति**रात्मानमपि च प्रजाः ।
त्रिवर्गेणोपसन्धत्ते, निहन्ति ध्रुवमन्यथा ॥१७६॥

इदमेव नरेन्द्राणां स्वर्गद्वारमनर्गलम् ।
यदात्मनः प्रतिज्ञा च प्रजा च परिपाल्यते ॥१७७॥
नियुक्तहस्तार्पितराज्यभारास्तिष्ठन्ति ये सौधविहारसाराः ।
बिडालवृन्दार्पितदुग्धपूराः स्वपन्ति ते मूढधियः क्षितीन्द्राः ॥१७८॥
मृतो दरिद्रः पुरुषो, मृतं राष्ट्रमराजकम् ।
मृतमश्रोत्रियं श्राद्धं, मृतो यज्ञस्त्वदक्षिणः ॥१७९॥
सदञ्जनमसदनुशासनमाश्रितभरणं च राजचिन्हानि ।
अभिषेकः, पटबन्धो, बालव्यजनं व्रणस्यापि ॥१८०॥
नागो भवति मदेन, कं जलरुहैः, पूर्णेन्दुना शर्वरी
शीलेन प्रमदा, जवेन तुरगो, नित्योत्सवैर्मन्दिरम् ।
वाणी व्याकरणेन, हंसमिथुनैर्नद्यः, सभा पण्डितैः
सत्पुत्रेण कुलं, **नृपेण वसुधा**, लोकत्रयं विष्णुना ॥१८१॥
राजंस्त्वत्कीर्तिचन्द्रेण तिथयः पौर्णिमाः कृताः ।
मद्गेहान्न बहिर्याति तिथिरेकादशी भयात् ॥१८२॥
फलहीनं नृपं भृत्याः कुलीनमपि चोन्नतम् ।
सन्त्यज्यान्यत्र गच्छन्ति, शुष्कं वृक्षमिवाण्डजाः ॥१८३॥
नापरीक्ष्य महीपालः प्रकर्तुं भृत्यमर्हति ।
अकुलीननराकीर्णो न राजा सुखमेधते ॥१८४॥
यो यत्र कुशलः कार्ये तत्र तं विनियोजयेत् ।
कार्येष्वदृष्टकर्मा यः शास्त्रज्ञोऽपि विमुह्यति ॥१८५॥
राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापाः, समे समाः ।

राजानमनुवर्तन्ते, **यथा राजा तथा प्रजाः** ॥१८६॥
स्वधर्मरूपो राजेन्द्रो, दयारूपेण मन्त्रिणः ।
सेवकाः साधुरूपेण, **यथा राजा तथा प्रजाः** ॥१८७॥
राजा राक्षसरूपेण, व्याघ्ररूपेण मन्त्रिणः ।
सेवकाः श्वानरूपेण, **यथा राजा तथा प्रजाः** ॥१८८॥

उपेक्षितः क्षीणबलोऽपि **शत्रुः** प्रमाददोषात्पुरुषैर्मदान्धैः ।
साध्योऽपि भूत्वा प्रथमं ततोऽसावसाध्यतां व्याधिरिव प्रयाति॥१८९॥
उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्ताधामयः स च ॥१९०॥
विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥१९१॥
वैरिणा न हि सन्दध्यात्सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥१९२॥
शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा ।
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम् ॥१९३॥

स ह्यमात्यः सदा श्रेयान्काङ्क्षिणीं यः प्रवर्धयेत् ।
कोषः कोषवतः प्राणाः, प्राणाः प्राणाः न भूपतेः ॥१९४॥
दुर्मन्त्री राज्यनाशाय, ग्रामनाशाय कुञ्जरः ।
शालको गृहनाशाय, सर्वनाशाय मातुलः ॥१९५॥

अन्तः सारैरकुटिलैरच्छिद्रैः सुपरीक्षितैः ।
मन्त्रिभिर्धार्यते राज्य सुस्तम्भैरिव मन्दिरम् ॥१९६॥
विद्वान् संसदि पाक्षिकः, परवशो मानी, दरिद्रो गृही
वित्ताढ्यः कृपणः, सुखी परवशो, वृद्धो न तीर्थाश्रितः ।
राजा दुःसचिवप्रियः, कुलभवो मूर्खः, पुमान् स्त्रीजितो
वेदान्ती रहितक्रियः, किमपरं हास्यास्पदं भूतले ॥१९७॥
विषदिग्धस्य भक्तस्य, दन्तस्य चलितस्य च ।
अमात्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् ॥१९८॥

लक्ष्मीर्लक्षणहीनेषु, कुलहीने सरस्वती ।
कुपात्रे रमते नारी, गिरौ वर्षति माधवः ॥१९९॥
यौवनं, धनसम्पत्तिः, प्रभुत्वमविवेकता ।
एकैकमप्यनर्थाय, किमु यत्र चतुष्टयम् ॥२००॥
जनयन्त्यर्जने दुःखं, तापयन्ति विपत्तिषु ।
मोहयन्ति च सम्पतौ, कथमर्थाः सुखावहाः ॥२०१॥
भक्ते द्वेषो, जडे प्रीतिरुचिर्गुरुलङ्घनम् ।
मुखे कटुकता नित्यं धनिनां ज्वरिणामिव ॥२०२॥
बधिरयति कर्णकुहरं, वदनं मूकयति, नयनमन्धयति ।
कुटिलयति गात्रयष्टिं, सम्पद्दोषोऽयमद्भुतो लोके ॥२०३॥
चांञ्चल्यमुच्चैःश्रवसस्तुरंगात्कौटिल्यमिन्दोर्विषतो विमोहः ।
इति श्रियाशिक्षि सहोदरेभ्यो, न वेद्मि कस्माद्गुणवद्विरोधः ॥२०४॥

कुटिला लक्ष्मीर्यत्र प्रभवति, न सरस्वती वसति तत्र ।
प्रायः श्वश्रूस्नुषयोर्न दृश्यते सौहृदं लोके ॥२०५॥
यस्याऽस्ति वित्तं स नरः कुलीनः, स पण्डितः, स श्रुतवान् गुणज्ञः ।
स एव वक्ता, स च दर्शनीयः, **सर्वे गुणाः काञ्चनमाश्रयन्ते** ॥२०६
यथा विहङ्गास्तरुमाश्रयन्ति, नद्यो यथा सागरमाश्रयन्ति ।
यथा तरुण्यः श्रियमाश्रयन्ति, सर्वे गुणाः काञ्चनमाश्रयन्ति ॥२०७॥
अर्थस्य पुरुषो दासो, दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज, बद्धोस्म्यर्थेन कौरवैः ॥२०८॥
विभवाः सर्वतः पूज्या, न शरीराणि देहिनाम् ।
चाण्डालोऽपि नरश्रेष्ठो, यस्यास्ति विपुलं धनम् ॥२०९॥
धनैर्निष्कुलीनाः कुलीना भवन्ति, धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यः परो बान्धवो नास्ति लोके धनान्यर्जयध्वं, धनार्जयध्वम्॥२१०॥
पूज्यते यदपूज्योऽपि, यदगम्योऽपि गम्यते ।
वंद्यते यदवंद्योऽपि, स प्रभावो धनस्य च ॥२११॥
देहे पित्तं, गृहे वित्तमेकचित्तं कुटुम्बिनाम् ।
ज्येष्ठपुत्रमतिश्रेष्ठं न भवन्ति गृहे गृहे ॥२१२॥

वरं **दारिद्र्य**मन्यायप्रभवाद्विभवादपि ।
शरीरे कृशता रम्या, स्थूलता न तु शोथिता ॥२१३॥
अपुत्रस्य गृहं शून्यं, सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः, सर्वशून्या दरिद्रता ॥२१४॥
लज्जन्ते बान्धवास्तेन, सम्बन्धं गोपयन्ति च ।

मित्राण्यमित्रतां यान्ति, यस्य न स्युः कपर्दिकाः ॥२१५॥
पक्षविकलश्च पक्षी, शुष्कश्च तरुः, सरश्च जलहीनम् ।
सर्पश्चोद्धृतदंष्ट्रस्तुल्यं लोके दरिद्रश्च ॥२१६॥
जीवन्तोऽपि मृताः पञ्च श्रूयन्ते किल भारते ।
दरिद्रो, व्याधितो, मूर्खः, प्रवासी, नित्यसेवकः ॥२१७॥
वनानि दहतो वन्हेः सखा भवति मारुतः ।
स एव दीपनाशाय, कृशे कस्यास्ति सौहृदम् ॥२१८॥
वृक्षं क्षीणफलं त्यजन्ति विहगाः, शुष्कं सरः सारसाः
पुष्पं पर्युषितं त्यजन्ति मधुपा, दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका, भ्रष्टश्रियं मंत्रिणः
सर्वः कार्यवशाज्जनोऽभिरमते, कस्यास्ति को वल्लभः ॥२१९॥
संपन्नतरमेवान्नं दरिद्रा भुञ्जते सदा ।
क्षुत्स्वादुतां जनयति, सा चाढ्येषु सुदुर्लभा ॥२२०॥
दारिद्र्यान्मरणाद्वा मरणं मम रोचते, न दारिद्र्यम् ।
अल्पक्लेशं मरणं, दारिद्र्यमनन्तकं दुःखम् ॥२२१॥
दारिद्र्याद् ह्रियमेति, ह्रीपरिगतः प्रभ्रश्यते तेजसो,
निस्तेजाः परिभूयते, परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचिमेति, शोकविहितो बुध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो, निधनता सर्वापदामास्पदम् ॥२२२॥
वरं बाल्ये मृत्युर्न पुनरधनं यौवनमिदम्
वरं भार्या वेश्या, न पुनरविनीता कुलवधूः ।

वरं देशत्यागो, न पुनरविवेकिप्रभुपुरं
वरं देहत्यागो, न पुनरधमागारमटनम् ॥२२३॥
दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न संतिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः, स्फारीभवन्त्यापदः ।
सत्वं ह्रासमुपैति, शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते ॥२२४॥
गगनमिव नष्टतारं, शुष्कमिव सरः, स्मशानमिव रौद्रम् ।
प्रियदर्शनमपि रूक्षं भवति गृहं धनविहीनस्य ॥२२५॥
कष्टा वृत्तिः पराधीना, कष्टो वासो निराश्रयः ।
निर्धनो व्यवसायश्च, **सर्वकष्टा दरिद्रता** ॥२२६॥
जिता धनवता दारा, जिता वस्त्रवता सभा ।
जितो ह्यभ्यागतो गोभिर्दारिद्र्यं कृषिभिर्जितम् ॥२२७॥
असतः श्रीमदान्धस्य दारिद्र्यं परमौषधम् ।
आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥२२८॥
हे दारिद्र्य नमस्तुभ्यं, सिद्धोऽहं त्वत्प्रसादतः ।
पश्याम्यहं जगत्सर्वं, न मां पश्यति कश्चन ॥२२९॥

परोपकारः कर्तव्यः प्राणैरपि धनैरपि ।
परोपकारजं पुण्यं न स्यात्क्रतुशतैरपि ॥२३०॥
तृणं चाहं वरं मन्ये नरादनुपकारिणः ।
ग्रासो भूत्वा पशून्पाति, भीरून्पाति रणाङ्गणे ॥२३१॥
परोपकारशून्यस्य धिङ् मनुष्यस्य जीवितम् ।

धन्यास्ते पशवो येषां चर्माप्युपकरिष्यति ॥२३२॥
परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः, **परोपकारार्थमिदं शरीरम्** ॥२३३॥
शुभं ब्रूयाच्छुभं ध्यायेच्छुभमिच्छेच्च शाश्वतम् ।
जन्तूनामुपकाराय कुर्याद्देहादिचालनम् ॥२३४॥
गच्छतस्तिष्ठतो वापि, जाग्रतः, स्वपतोऽपि वा ।
यन्न भूतहितार्थाय, तत्पशोरिव चेष्टितम् ॥२३५॥
आदौ सत्ययुगे बलिस्तदनु च त्रेतायुगे राघवो
रामः सत्यपराक्रमोऽथ भगवान्, धर्मस्तथा द्वापरे ।
दाता कोऽपि न चास्ति संप्रति कलौ, जीवन्ति केनार्थिनः
इत्येवं कृतनिश्चयेन विधिना **व्यापारिणो** निर्मिताः ॥२३६॥
धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
तन्निमित्तो वरं त्यागो विनाशे नियते सति ॥२३७॥
रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः ।
एते परोपकाराय युगे देवेन विनिर्मिताः ॥२३८॥
परोपकृतिकैवल्ये तोलयित्वा जनार्दनः ।
गुर्वीमुपकृतिं मत्वा ह्यवतारान् दशाग्रहीत् ॥२३९॥
मय्येव जीर्णतां यातु यत्त्वयोपकृतं कपे ।
नरः प्रत्युपकारार्थं विपत्तिमभिवाञ्छति ॥२४०॥

दानं प्रियवाक्सहितं, ज्ञानमगर्वं, क्षमान्वितं शौर्यम् ।
वित्तं त्यागसमेतं, दुर्लभमेतच्चतुर्विधं भद्रम् ॥२४१॥

दानेन भूतानि वशीभवन्ति, दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानैर्दानं हि सर्वव्यसनानि हन्ति ॥२४२॥
यो नात्मजे, न च गुरौ, न च बन्धुवर्गे
दीने दयां न करुते, न च भृत्यवर्गे ।
किं तस्य जीवितफलं हि मनुष्यलोके
काकोऽपि जीवति चिराय, बलिं च भुंक्ते ॥२४३॥
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥२४४॥
सुपात्रदानाच्च भवेद्धनाढ्यो, धनप्रभावेण करोति पुण्यम् ।
पुण्यप्रभावात्सुरलोकवासी, पुनर्धनाढ्यः, पुनरेव भोगी ॥२४५॥
गौरवं प्राप्यते दानान्न तु वित्तस्य सञ्चयात् ।
स्थितिरुच्चैः पयोदानां, पयोधीनामधः स्थितिः ॥२४६॥
दानोपभोगरहिता दिवसा यान्ति यस्य वै ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥२४७॥
धर्मार्थं क्षीणवित्तस्य क्षीणत्वमपि शोभते ।
सुरैः पीतावशेषस्य कृष्णपक्षे विधोरिव ॥२४८॥
सदादानः परिक्षीणः शस्त एव करीश्वरः ।
अदानः पीनगात्रोऽपि निन्द्य एव हि गर्दभः २४९॥

दाता नीचोऽपि सेव्यः स्यान्निष्फलो न महानपि ।
जलार्थी वारिधिं त्यक्त्वा पश्य कूपं निषेवते ॥२५०॥

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन न लभ्यन्ते, चत्वारः सहजा गुणाः ॥२५१॥
शतेषु जायते शूरः, सहस्रेषु च पण्डितः ।
वक्ता दशसहस्रेषु, दाता भवति वा न वा ॥२५२॥
मेरुर्दूरगतो, महान् हिमगिरिः प्रालेयमात्रोऽभवत्
चन्द्रः श्रीसहितोऽपि याचकभयात्क्षीणत्वमालम्बते ।
कौपीनं धृतवान् हरोऽपि, सहसा विष्णुर्जले संस्थितः
वारां राशिरपेयतामुपगतः को नाम दातुं क्षमः ॥२५३॥
दातुः परोपकृतिनिर्भरचित्तवृत्तेरासन्नदूरगणना न हि संश्रितेषु ।
भानुर्विकासयति हन्त सरोजषंडं पाणिस्थमङ्कजसमं भुवनान्तरेषु॥२५४
एकेन तिष्ठताधस्तादन्येनोपरि तिष्ठता ।
दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥२५५॥
दातुरुन्नतवित्तस्य, गुणयुक्तस्य चार्थिनः ।
दुर्लभः खलु संयोगः सद्बीजक्षेत्रयोरिव ॥२५६॥
वित्तं परिमितमधिकव्ययशीलं पुरुषमाकुली कुरुते ।
ऊनांशुकमिव पीनस्तनजघनायाः कुलीनायाः ॥२५७॥

कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ॥२५८॥
अप्रगल्भस्य या विद्या, कृपणस्य च यद्धनम् ।
यच्च बाहुबलं भीरोर्व्यर्थमेतत्त्रयं भुवि ॥२५९॥
पिपीलिकार्जितं धान्यं, मक्षिकासंचितं मधु ।

लुब्धेन संचितं द्रव्यं समूलं च विनश्यति ॥२६०॥
अयश्चणकचर्वणं, फणिफणामणेः कर्षणं
करेण करितोलनं, जलनिधेः पदा लंघनम् ।
प्रसुप्तहरिबोधनं निशितखड्गसंरोपणं ह्ग
कदाचिदपि संभवेन्न कृपणस्य वित्तार्जनम् ॥२६१॥
न देवाय न धर्माय न बन्धुभ्यो न चार्थिने ।
कृपणेनार्जितं द्रव्यं भुज्यते गजतस्करैः ॥२६२॥
प्रायेणार्थाः कदर्याणां न सुखाय कदाचन ।
इह चात्मोपतापाय, मृतस्य नरकाय च ॥२६३॥
यत्करोत्यरतिं क्लेशं तृष्णां मोहं प्रजागरम् ।
न तद्धनं कदर्याणां, हृदये व्याधिरेव सः ॥२६४॥

लोभमूलानि पापानि, व्याधयो रसमूलकाः ।
स्नेहमूलानि दुःखानि, त्रीणि त्यक्त्वा सुखी भव ॥२६५॥
लोभश्चेदगुणेन किं, पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं, शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं जनैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥२६६॥
लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥२६७॥
एकं दृष्ट्वा, शतं दृष्ट्वा, दृष्ट्वा पञ्चशतान्यपि ।
अतिलोभो न कर्तव्यश्चक्रं भ्रमति मस्तके ॥२६८॥

दानेन तुल्यो निधिरस्ति नान्यो,
लोभाच्च नान्योऽस्ति रिपुः पृथिव्याम् ।
विभूषणं शीलसमं न चान्य-
त्संतोषतुल्यं धनमस्ति नान्यत् ॥२६९॥

आशैव राक्षसी पुंसामाशैव विषमञ्जरी ।
आशैव जीर्णमदिरा, नैराश्यं परमं सुखम् ॥२७०॥
तृष्णयैवाखिलादोषास्तच्छित्त्वैवाखिला गुणाः ।
मोदाः सर्वे विद्ययैव, शोकाः सर्वेप्यविद्यया ॥२७१॥
दन्ता विशलथदन्ताः, केशाः काशप्रसूनसंकाशाः ।
नयनं तमसामयनं, तथापि चित्तं धनांगनायुक्तम् ॥२७२॥
च्युता दन्ताः, सिताः केशा, वाङ्निरोधः पदे पदे ।
पातसज्जमिमं देहं तृष्णा साध्वी न मुञ्चति ॥२७३॥
दरिद्रस्य परा मूर्तिस्तृष्णा, न द्रविणाल्पता ।
जरद्गवधनः शम्भुस्तथापि परमेश्वरः ॥२७४॥
निःस्वो वष्टि शतं, शती दशशतं, लक्षं सहस्राधिपो
लक्षेशः क्षितिराजतां, क्षितिपतिश्चक्रेशतां वाञ्छति ।
चक्रेशः सुरराजतां, सुरपतिर्ब्रह्मास्पदं वाञ्छति
ब्रह्मा शैवपदं, शिवो हरिपदं, तृष्णावधिं को गतः ॥२७५॥
वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इह परितोषो, निर्विशेषो, विशेषः ।

स तु भवति दरिद्री यस्य तृष्णा विशाला
मनसि च परितुष्टे कोर्थवान्को दरिद्री ॥२७६॥
ते धन्याः, पुण्यभाजस्ते, तैस्तीर्णः क्लेशसागरः ।
जगत्संमोहजननी यैराशाविषी जिता ॥२७७॥
त्वामुदर साधु मन्ये, शाकैरपि यदसि लब्धपरितोषम् ।
हत हृदयं ह्यधिकाधिकवाञ्छाशतदुर्भरं न पुनः ॥२७८॥
तृष्णाभुजङ्गदंशेन भूरिविभ्रान्तचेतसाम् ।
नौषध्यो, न च मन्त्राः स्युः, शमाय मणयोऽपि न ॥२७९॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥२८०॥
केचित्स्वभावलुब्धास्तीव्रतरां यातनामपि सहन्ते ।
न तु संत्यजन्ति वित्तं, मात्सर्यमिवाधमाः सततम् ॥२८१॥

याचना हि पुरुषस्य महत्वं नाशयत्यखिलमेव तथा हि ।
सद्य एव भगवानपि विष्णुर्वामनो भवति याचितुमिच्छन् ॥२८२॥
तावन्महतां महती यावत्किमपि हि न याच्यते लोकम् ।
बलिमनुयाचनसमये श्रीपतिरपि वामनो जातः ॥२८३॥
तृणं लघु, तृणात्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ, मामयं याचयिष्यति ॥२८४॥
अभ्रवृन्दं विशाखान्तं, प्रसूत्यन्तं च यौवनम् ।
राज्यान्तं नरकं तद्वद्याचनान्तं च गौरवम् ॥२८५॥

विशाखान्तं गता मेघाः, प्रसवान्तं हि यौवनम् ।
प्रणामान्तं सतां कोपो, **याचनान्तं च गौरवम्** ॥२८६॥
अर्था न सन्ति, न च मुञ्चति मां दुराशा
त्यागे रतिं वहति दुर्ललिते मनो मे ।
याच्ञा च लाघवकरी, स्ववधे च पापं
प्राणाः स्वयं व्रजत किं परिदेवितेन ॥२८७॥
तावत्सर्वगुणालयः, पटुमतिः, साधुः, सतां वल्लभः
शूरः, सच्चरितः, कलङ्करहितो, मानी, कृतज्ञः, कविः ।
यावन्निष्ठुरवज्रपातसदृशो देहीति नो भाषते
तस्माद्वाक्यमिदं ममाश्रृणु सखे, मा ब्रूहि दीनं वचः ॥२८८॥
तन्मूलं गुरुतायास्तत्सौख्यं, तद्यशस्तदौर्जित्यम ।
तत्सौभाग्यं पुंसां, यदेतदप्रार्थनं नाम ॥२८९॥
साधुरेवार्थिभिर्याच्यः क्षीणवित्तोऽपि सर्वदा ।
शुष्कापि हि नदी मार्गे खन्यते सलिलार्थिभिः ॥२९०॥
वदनाच्च बहिर्यान्ति प्राणा याच्ञाक्षरैः सह ।
ददामीत्यक्षरैर्दातुः पुनः कर्णाद्विशन्ति हि ॥२९१॥
तीक्ष्णधारेण खड्गेन वरं जिह्वा द्विधा कृता ।
न तु मानं परित्यज्य, देहि देहीति भाषितम् ॥२९२॥

शिरसा धार्यमाणोऽपि सोमः सौम्येन शम्भुना ।
तथापि कृशतां धत्ते, कष्टः खलु **पराश्रयः** ॥२९३॥

अयममृतनिधानं नायकोऽप्योषधीना-
ममृतमयशरीरः कान्तियुक्तोऽपि चन्द्रः ।
भवति विगतरश्मिर्मण्डलं प्राप्य भानोः
परसदननिविष्टः को लघुत्वं न याति ॥२९४॥
कष्टं खलु मूर्खत्वं, कष्टं खलु यौवनेषु दारिद्र्यम् ।
कष्टात्कष्टतरं किं, परगृहवासः परान्नं च ॥२९५॥
आस्ते विधुः परमनिर्वृत एव मौलौ
शम्भोरिति त्रिजगतीजनचित्तवृत्तिः ।
अन्तर्निगूढनयनानलदाहदुःखं
जानाति कः परभृते बत शीतरश्मेः ॥२९६॥
रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं, यन्मरणं सोऽस्य विश्रामः ॥२९७॥
वृद्धकाले मृता भार्या, बन्धुहस्तगतं धनम् ।
भोजनं च पराधीनं त्रयं पुंसां विडम्बनम् ॥२९८॥
परान्नं परवस्त्रं च परशय्याः परस्त्रियः ।
परवेश्मनि वासश्च शक्रस्यापि श्रियं हरेत् २९९॥

क्षान्त्या भीरुः, कोपयुक्तो मूर्खः, **सेवक** उच्यते ।
रूपवांश्च भवेज्जारः, सेवाधर्मोऽतिदुर्गमः ॥३००॥
सेवा श्ववृत्तिर्यैरुक्ता, न तैः सम्यगुदाहृतम् ।
स्वच्छन्दचारी कुक्कुरश्वा, विक्रीतासुः क्व सेवकः ॥३०१॥

नैषां सन्ध्याविधिरविकलो, नाच्युतार्चाऽपि सांगा
न स्वे काले हवननियमो, नापि वेदार्थचिन्ता ।
न क्षुद्वेलानियतमशनं, नापि निद्रावकाशो
न द्यौ लोकावपि तनुभृतां राजसेवापराणाम् ॥३०२॥
आहारे षडवानलश्च शयने यः कुम्भकर्णायते
संदेशे बधिरः, पलायनविधौ सिंहः, शृगालो रणे ।
अन्धो वस्तुनिरीक्षणेऽथ गमने खञ्जः, पटुः क्रन्दने
भाग्येनैव हि लभ्यते पुनरसौ सर्वोत्तमः सेवकः ३०३॥
द्यूतेन धनमिच्छन्ति, मानमिच्छन्ति सेवया ।
भिक्षया भोगमिच्छन्ति, ते दैवेन विडम्बिताः ॥३०४॥
स्वाभिप्रायपरोक्षस्य, परचित्तानुवर्तिनः ।
स्वयं विक्रीतदेहस्य सेवकस्य कुतः सुखम् ॥३०५॥
शीतवातातपक्लेशान्सहन्ते यान्पराश्रिताः ।
तदंशेनापि मेधावी तपस्तप्त्वा सुखी भवेत् ॥३०६॥
प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः, को मूढः सेवकादन्यः ॥३०७॥
मौनान्मूर्खः, प्रवचनपटुर्वातुलो जल्पको वा,
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति, नियतं दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥३०८॥
भेतव्यं नृपतेस्ततः सचिवतो, राज्ञस्ततो वल्लभा-

दन्येभ्यश्च वसन्ति येऽस्य भवने लब्धप्रसादा विटाः ।
दैन्यादुन्मुखदर्शनापलपनैः पिण्डार्थमायस्यतः
सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः ॥३०९

मृत्युर्जन्मवतां वीर देहेन सह जायते ।
अद्य वाब्दशतान्ते वा **मृत्युर्वै प्राणिनां ध्रुवः** ॥३१०॥
अर्था हसन्त्युचितदानविहीनलुब्धं
भूम्यो हसन्ति मम भूमिरिति ब्रुवाणम् ।
जारा हसन्ति तनयानुपलालयन्तं
मृत्युर्हसत्यवनिपं रणरङ्गभीरुम् ॥३११॥
मृत्युः शरीरगोप्तारं, वसुभाजं वसुंधरा ।
दुश्चारिणीव हसति स्वपतिं पुत्रलालनात् ॥३१२॥
मृत्योर्बिभेषि किं मूढ, भीतं मुञ्चति किं यमः ।
अजातं नैव गृह्णाति, कुरु यत्नमजन्मनि ॥३१३॥
अनुचितकार्यारम्भः स्वजनविरोधो बलीयसा स्पर्धा ।
प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि ॥३१४॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥३१५॥
पंडिते चैव मूर्खे च बलवत्यपि दुर्बले ।
ईश्वरे च दरिद्रे च मृत्योः सर्वत्र तुल्यता ॥३१६॥

वैद्यराज नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते ॥३१७॥
वैद्यराज नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान्, वैद्यः प्राणान्धनानि च ॥३१८॥
वैद्यानां शारदं माता, पिता च कुसुमाकरः ।
यमदंष्ट्रा स्वसा प्रोक्ता, **हितभुङ्मितभुग्रिपुः** ॥३१९॥
व्याधेस्तत्वपरिज्ञानं, वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं, न वैद्यः प्रभुरायुषः ॥३२०॥
स्वस्थैरसाध्यरोगैश्च जन्तुभिर्नास्ति किञ्चन ।
कातरा दीर्घरोगाश्च भिषजां भाग्यहेतवः ॥३२१॥
भैषज्यं तु यथाकामं, पथ्यं तु कठिनं वदेत् ।
आरोग्यं वैद्यमाहात्म्यादन्यथात्वमपथ्यतः ॥३२२॥
रोगस्योपक्रमे सान्त्वं, मध्ये किंचिद्धनव्ययः ।
शनैरनादरः शान्तौ, स्नातो वैद्यं न पश्यति ॥३२३॥
न देशो मनुजैर्हीनो, न मनुष्या निरामयाः ।
ततः सर्वत्र वैद्यानां सुसिद्धा एव वृत्तयः ॥३२४॥
वैद्या वदन्ति कफपित्तमरुद्विकारान्
ज्योतिर्विदो ग्रहगतिं परिवर्तयन्ति ।
भूताभिषंग इति भूतविदो वदन्ति
प्राचीनकर्म बलवन्मुनयो वदन्ति ॥३२५॥
सद्यः फलति गान्धर्वं, मासमेकं पुराणकम् ।

वेदाः फलन्ति कालेषु, ज्योतिर्वैद्यं निरन्तरम् ॥३२६॥
मन्त्रिणां भिन्नसन्धाने, भिषजां सान्निपातके ।
कर्मणि व्यज्यते प्रज्ञा, **सुस्थे को वा न पण्डितः** ॥३२७॥
अन्यानि शास्त्राणि विनोदमात्रं, प्राप्तेषु वा तेषु न तैश्च किञ्चित् ।
चिकित्सितं, ज्योतिषमन्त्रवादाः पदे पदे प्रत्ययमावहन्ति ॥३२८॥

नष्टं मृतमतिक्रान्तं नानुशोचन्ति **पण्डिताः** ।
पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः ॥३२९॥
यस्य कृत्यं न जानन्ति, मंत्रं वा मंत्रितं परे ।
कृतमेवास्य जानन्ति स वै पंडित उच्यते ॥३३०॥
नाप्राप्यमभिवाञ्छन्ति, नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥३३१॥
न हृष्यत्यात्मसम्माने, नावमानेन तप्यते ।
गांगो ह्रद इवाक्षोभ्यो यः, स पण्डित उच्यते ॥३३२॥
अर्थं महान्तमासाद्य, विद्यामैश्वर्यमेव वा ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥३३३॥
गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या यत्नतः पंडितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥३३४॥
चलत्येकेन पादेन तिष्ठत्यन्येन पण्डितः ।
नापरीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥३३५॥

विद्याविनयसंपन्ने ब्राह्मणे, गवि, हस्तिनि ।
शुनि चैव, श्वपाके च, **पण्डिताः समदर्शिनः** ॥३३६॥
अनर्घमपि माणिक्यं हेमाश्रयमपेक्षते ।
विनाश्रयं न शोभन्ते पण्डिता, वनिता, लताः ॥३३७॥
शोकस्थानसहस्राणि, भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति, न पण्डितम् ॥३३८॥

मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव सूकरः ॥३३९॥
दूरतः शोभते मूर्खो लम्बशाटपटावृतः ।
तावच्च शोभते मूर्खो यावत्किञ्चिन्न भाषते ॥३४०॥
वरं दरिद्रः श्रुतिशास्त्रपारगो, न चापि भूर्खो बहुरत्नसंयुतः ।
सुलोचना जीर्णपटापि शोभते, न नेत्रहीना कनकैरलंकृता ॥३४१॥
हय तुरगशतैः प्रयान्तु मूर्खा, धनरहिता विबुधाः प्रयान्तु पद्भ्याम् ।
गिरिशिखरगतापि काकपांक्तिः, पुलिनगतैर्न समत्वमेति हंसैः ॥३४२॥
लुब्धानां याचकः शत्रुर्मूर्खाणां बोधको रिपुः ।
जारिणीनां पतिः शत्रुश्चोराणां चन्द्रमा रिपुः ॥३४३॥
मूर्खशिष्योपदेशेन, दुष्टस्त्रीभरणेन च ।
दुःखितां संप्रयोगेण पण्डितोऽप्यवसीदति ॥३४४॥
क्षणमात्रं ग्रहावेशो, याममात्रं सुरामदः ।
लक्ष्मीमदस्तु मूर्खाणामादेहमनुवर्तते ॥३४५॥

देवताराधनैः शास्त्रैः कालो गच्छति धीमताम् ।
मूर्खाणां तु दिवारात्रं द्यूतेन कलहेन वा ॥३४६॥
मूर्खस्य पञ्च चिन्हानि गर्वी दुर्वचनी तथा ।
हटी चाप्रियवादी च परोक्तं नैव मन्यते ॥३४७॥
मूर्खत्वं सुलभं भजस्व, कुमते, मूर्खस्य चाष्टौ गुणा
निश्चिन्तो, बहुभोजकोऽतिमुखरो, रात्रिं दिवं स्वप्नभाक् ।
कार्याकार्यविचारणान्धबधिरो, मानापमाने समः
प्रायेणामयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥३४८॥
हरेः पदाहतिः श्लाघ्या, न श्लाघ्यं खररोहणम् ।
स्पर्धाऽपि विदुषा युक्ता, **न युक्ता मूर्खमित्रता** ॥३४९॥
पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः ।
वानरेण हतो राजा, विप्राश्चोरेण रक्षिताः ॥३५०॥
मूर्खाणां पण्डिता द्वेष्या अधनानां महाधनाः ।
पराङ्गना कुलस्त्रीणां, सुभगानां च दुर्भगाः ॥३५१॥
मुक्ताफलैः किं मृगपक्षिणां च, **मिष्टान्नपानैः किमु गर्दभानाम्** ।
पैः अन्धस्य दीपेन, बधिरस्य गीतैः, मूर्खस्य किं धर्मकथाप्रसंगैः ॥३५२॥
लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्छशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥३५३॥

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥३९४॥
यः स्वभावो हि यस्यास्ति, स नित्यं दुरतिक्रमः ।
श्वा यदि क्रियते राजा, स किं नाश्नात्युपानहम् ॥३९५॥
सर्वस्य हि परीक्ष्यन्ते स्वभावा, नेतरे गुणाः ।
अतीत्य हि गुणान् सर्वान् **स्वभावो मूर्ध्नि वर्तते** ॥३९६॥
व्याघ्रस्तुष्यति कानने, सुगहनां सिंहो गुहां सेवते
हंसोऽह्राय च पद्मिनीं कुसुमितां, गृध्रः श्मशानस्थले ।
साधुः सत्कृतिसाधुमेव भजते, नीचोऽपि नीचं जनं
या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ॥३९७॥
काकः पद्मवने रतिं न कुरुते, हंसो न कूपोदके
मूर्खः पण्डितसंगमे न रमते, दासो न सिंहासने ।
कुस्त्री सज्जनसंगमे न रमते, नीचं जनं सेवते
या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ॥३९८॥

क्रोध एव महान् शत्रुस्तृष्णा वैतरणी नदी ।
संतोषो नन्दनवनं, शान्तिरेव हि कामधुक् ॥३९९॥
स्त्री विनश्यति गर्वेण, तपः क्रोधेन नश्यति ।
गावो दूरप्रसारेण हरिणी लोभलिप्सया ॥४००॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥४०१॥

नरकस्योपस्थितिं नाम नान्यां मन्यामहे वयम् ।
यदेषा दृश्यतेऽमुष्मिन्नरे कोपस्य रे स्थितिः ॥४०२॥
नास्ति क्षुधासमं दुःखं, नास्ति रोगः क्षुधासमः ।
नास्त्याहारसमं सौख्यं, **नास्ति क्रोधसमो रिपुः** ॥४०३॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः, क्रोधस्तथा लोभस्तस्मादेत् त्रयं त्यजेत् ॥४०४॥
जरा रूपं हरति, हि धैर्यमाशा, मृत्युः प्राणान्, धर्मचर्यामसूया ।
कामो ह्रीयं, वृत्तमनार्यसेवा, क्रोधः श्रियं, सर्वमेवाभिमानः ॥४०५॥
ईर्ष्याभयक्रोधसमन्वितेन, लुब्धेन, रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिपाकमेति ॥४०६॥
क्रोधो मूलमनर्थानां, क्रोधः संसारबन्धनम् ।
धर्मक्षयकरः क्रोधस्तस्मात् क्रोधं विवर्जयेत् ॥

कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि ।
अकर्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ॥४०७॥
कर्मण्येवाधिकारस्ते, मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥४०८॥
तस्मादसक्तः सततं, कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥४०९॥
नियतं संगरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म **यत्तत्सात्विकमुच्यते** ॥४१०॥

यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् ।
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ॥३७१॥

अतिपरिचयादवज्ञा संततगमनादनादरो भवति ।
मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥३७२॥
अतिपरिचयादवज्ञा संततगमनादनादरो भवति ।
लोकः प्रयागवासी कूपे स्नानं समाचरति ॥३७३॥
अतिपरिचयादवज्ञा, इति यद्वाक्यं मृषैव तद्वाति ।
अतिपरिचितेऽप्यनादौ संसारेऽस्मिन्न जायतेऽवज्ञा ॥३७४॥
सन्निकर्षोऽत्र मर्त्यानामनादरणकारणम् ।
गांगं हित्वा यथान्याम्भस्तत्रत्यो याति शुद्धये ॥३७५॥
प्रथमदिवसचन्द्रः सर्वलोकैकवन्द्यः
स च सकलकलाभिः पूर्णचन्द्रो न वन्द्यः ।
अतिपरचयदोषात्कस्य नो मानहानिर्
नवनवगुणरागी प्रायशः सर्वलोकः ॥३७६॥

सुखं हि दुःखान्यनुभूय शोभते, घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां, धृतः शरीरेण मृतः स जीवति॥३७७
यदेवोपनतं दुःखात्सुखं तद्रसवत्तरं ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषितः ॥३७८॥
दिनमेकं शशी पूर्णः, क्षीणस्तु बहुवासरान् ।
सुखाद्दुःखं सुराणामप्याधिकं, का कथा नृणाम् ॥३७९॥

कस्य दोषः कुले नास्ति, व्याधिना को न पीडितः ।
व्यसनं केन न प्राप्तं, **कस्य सौख्यं निरन्तरम्** ॥३८०॥
सुखस्यानन्तरं दुःखं, दुःखस्यानन्तरं सुखम् ।
न नित्य लभते दुःखं, **न नित्यं लभते सुखम्** ॥३८१॥
सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः, स्वकर्मसूत्रग्रथितो हि लोकः ॥३८२॥
यत्तदग्रे विषमिव, परिणामेऽमृतोपमम् ।
तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥३८३॥
विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव, **तत्सुखं राजसं स्मृतम्** ॥३८४॥
यदग्रे चानुबंधे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥३८५॥

क्षमा वशीकृतिर्लोके, क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥३८६॥
सोऽस्य दोषो न मन्तव्यः, क्षमा हि परमं बलम् ।
क्षमा गुणो ह्यशक्तानां, **शक्तानां भूषणं क्षमा** ॥३८७॥
क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वन्हिः स्वयमेवोपशाम्यति ॥३८८॥
क्षमा ब्रह्म, क्षमा सत्यं, क्षमा भूतं च भावि च ।
क्षमा तपः, क्षमा शौचं, क्षमयेदं धृतं जगत् ॥३८९॥

उपमा **कालिदासस्य**, भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं, माघे सन्ति त्रयो गुणाः ॥३९०॥
पुष्पेषु चम्पा, नगरीषु लङ्का, नदीषु गङ्गा, नृपेषु रामः ।
योषित्सु रम्भा, पुरुषेषु विष्णुः, काव्येषु माघः, कविकालिदासः॥३९१
पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥३९२॥
माघश्चोरो मयूरो मुररिपुपरमो भारविः साररविद्यः
श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः ।
श्रीदंडी डिंडिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः
ख्याताश्चान्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति ॥३९३॥
यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः, कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो, हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ॥३९४॥
कान्पृच्छामः, सुधा स्वर्गे, निवसामो वयं भुवि ।
किं वा काव्यरसः स्वादु, किं वा स्वादीयसी सुधा ॥३९५॥
काव्येषु नाटकं रम्यं, **तत्रापि च शकुन्तला** ।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥३९६॥
यास्यत्यद्य शकन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या ।
अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः

शुश्रूषस्व गुरून्, कुरु प्रियसखीवृत्तिं सपत्नीजने ॥३९७॥
भारते सारमुद्योगं, तत्रापि विदुरोक्तयः ।
सनत्सुजातं तत्रापि, तत्र श्लोकचतुष्टयम् ॥३९८॥
प्रातःस्नानं, गवां सेवा, आरामः पुष्पवाटिका ।
मातापित्रोश्च शुश्रूषा **शास्त्राय च सुखाय च** ॥३९९॥
प्राणाघातान्निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यं
काले शक्त्या प्रदानं, युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो, गुरुषु च विनयः, सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः **श्रेयसामेष पन्थाः** ॥४००॥

द्वितीयावलिः ।

गवीशपत्रो, नगजापहारी, कुमारतातः, शशिखण्डमौलिः ।
लंकेशसंपूजितपादपद्मः **पायादनादिः परमेश्वरो नः** ॥१॥
कल्पान्तः क्रूरकेलिः, क्रतुकदनकरः, कुन्दकर्पूरकान्तिः
क्रीडन्कैलासकूटे, कलितकुमुदिनीकामुकः, कान्तकायः ।
कङ्कालक्रीडनोत्कः, कलितकलिकलः, कालकालीकलत्रः
कालिन्दीकालकण्ठः, कलयतु कुशलं कोऽपि कापालिको नः ॥२॥
यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्

प्रोद्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥३॥
भवारण्यं भीमं तनुगृहमिदं छिद्रबहुलं
बली कालश्चोरो नियतमसिता मोहरजनी ।
गृहीत्वा ज्ञानासिं विरतिफलकं शीलकवचं
समाधानं कृत्वा स्थिरतरदृशो जाग्रत जनाः ॥४॥
न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥५॥
आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥६॥
पतितः पशुरपि कूपे निःसर्तुं चरणचालनं कुरुते ।
धिक् त्वां, चित्त, भवाब्धेरिच्छामपि नो बिभर्षि निःसर्तुम् ॥७॥
आयुः कल्लोललोलं, कतिपयदिवसस्थायिनी यौवनश्री-
रर्थाः संकल्पकल्पा, घनसमयतडिद्विभ्रमा भोगपूराः ।
कण्ठाश्लेषोपगूढं तदपि न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥८॥
जिह्वे, कीर्तय केशवं, मुरिपुं चेतो भज, श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु ।

इत्थं लोकय लोचनद्वय, हरेर्गच्छाङ्घ्रियुग्मालयं,
जिघ्र घ्राण मुकुन्दपादतुलसीं, मूर्धन्नमाधोक्षजम् ॥९॥
निखिलं जगदेव नश्वरं, पुनरस्मिन्नितरां कलेवरम् ।
अथ तस्य कृते कियानयं क्रियते हन्त जनैः परिश्रमः ॥
प्रतिपलमखिलाँल्लोकान् मृत्युमुखं निविशितो निरीक्ष्यापि ।
हा हन्त चित्तमेतद्विरमति नाद्यापि विषयेभ्यः ॥१०॥
कदा वाराणस्यामरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥११॥
कदा वा साकेते विमलसरयूतीरपुलिने
चरन्तं श्रीरामं जनकतनयालक्ष्मणयुतम् ।
अये राम स्वामिन् जनकतनयावल्लभविभो
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥१२॥
न धनं न च राज्यसम्पदं न हि विद्यामिदमेकमर्थये ।
मयि धेहि मनागपि प्रभो, करुणाभङ्गितरङ्गितां दृशम् ॥१३॥
येन शुक्लीकृता हंसाः, शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन, स ते वृत्तिं विधास्यति ॥१४॥
यो मे गर्भगतस्यापि वृत्तिं कल्पितवान्प्रभुः ।
शेषवृत्तिविधानाय स किं सुप्तोऽथवा मृतः ॥१५॥
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।

तथा चेद्विश्वकर्तारं, **को न मुच्येत बन्धनात्** ॥१६॥
पिनाक**फ**णि**बा**लेन्दु**भ**स्म**म**न्दाकिनीयुता ।
पवर्गरचितामूर्तिरपवर्गप्रदायिनी ॥१७॥
स्वयं स्थाणुरपर्णा स्त्री विशाखस्तनयः स्मृतः ।
तथापि कुरुते छायां भवतापापहारिणीम् ॥१८॥
न दानं, न तपो, नेज्या, न शौचं, न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यविडम्बनम् ॥१९॥
चिकीर्षिते कर्मणि चक्रपाणेर्नापेक्ष्यते तत्र सहायसम्पत् ।
पाञ्चालजायाः पटसंविधाने मध्येसभं यन्न तुरी न वेमा ॥२०॥
शरीरं सुरूपं, तथा वा कलत्रं,
यशश्चारु चित्रं, धनं मेरुतुल्यम् ।
मनश्चेन्न लग्नं हरेरङ्घ्रिपद्मे,
ततः किं, ततः किं, ततः किं, ततः किम् ॥२१॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥२२॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि सत्तत्वम् ॥२३॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥२४॥
सर्वं खल्विदं ब्रह्म, सर्वमात्मेति भावयेत् ।
अहमन्यदिदं चान्यदित्येषा खण्डखण्डधीः ॥२५॥

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः ॥२६॥
जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके ।
ज्वालामालाकुले विष्णुः, **सर्वं विष्णुमयं जगत्** ॥२७॥
आत्मा नदी, संयमपुण्यतीर्था, सत्योदका, शीलतटा, दयोर्मिः ।
तत्राभिषेकं कुरु पांडुनन्दन, न वारिणा शुध्यति चान्तरात्मा ॥२८॥
अगाधे विमले शुद्धे सत्यतोये धृतिह्रदे ।
स्नातव्यं मानसे तीर्थे सत्वमालम्ब्य शाश्वतम् ॥२९॥
ममेति बध्यते जन्तुर्न ममेति च मुच्यते ।
बन्धाय विषयासक्तं, मुक्तौ निर्विषयं मनः ॥३०॥
अतीतेष्वनपेक्षा ये, प्राप्तेष्वर्थेषु निर्ममाः ।
शौचमेव परं तेषां, येषां नोत्पद्यते स्पृहा ॥३१॥
दुःखेष्वनुद्विग्नमनाः, सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥३२॥
कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर ॥३३॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥३४॥
ललिता गलिता रदावलिर्लवलीवद्भवली भवन्ति केशाः ।
न तथापि कथा रथांगपाणेः श्रवणप्रीतिकरीति मन्दरीतिः ॥३५॥
लोक एष विषयानुरञ्जनं दुःखगर्भमपि मन्यते सुखम् ।

आमिषं बडिशगर्भमप्यहो मोहतो ग्रसति यद्वदण्डजः ॥३६॥
अजानन् दाहार्तिं पतति शलभो दीपदहनं
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नाति पिशितम् ।
विजानन्तोऽप्येते वयमिह विपज्जालजटिला-
न्न मुञ्चामः कामानहह गहनो मोहमहिमा ॥३७॥
वपुः कुब्जीभूतं, गतिरपि तथा यष्टिशरणा
विशीर्णा दन्तालिः, श्रवणविकलं श्रोत्रयुगलम् ।
शिरः शुक्लं, चक्षुस्तिमिरपटलैरावृतमहो
मनो मे निर्लज्जं तदपि विषयेभ्यः स्पृहयति ॥३८॥
मातर्माये, भगिनि कुमते, हे पितर्मोहजालं,
व्यावर्तध्वं, भवतु भवतामेष दीर्घो वियोगः ।
सद्यो लक्ष्मीरमणचरणभ्रष्टगङ्गाप्रवाह-
व्यामिश्रायां दृषदि परमब्रह्मदृष्टिर्भवामि ॥३९॥
महाशय्या भूमिर्मसृणमुपधानं भुजलता
वितानं चाकाशं, व्यजनमनुकूलोऽयमनिलः ।
स्फुरच्चन्द्रो दीपः, स्वधृतिवनितासंगमुदितः
सुखं शान्तः शेते विगतभवभीतिर्नृप इव ॥४०॥
प्रातर्मूत्रपुरीषाभ्यां, मध्यान्हे क्षुत्पिपासया ।
तृष्णाकामेन बाध्यन्ते प्राणिनो निशि निद्रया ॥४१॥
निर्विवेकतया बाल्यं, कोपोन्मादेन यौवनम् ।
वृद्धत्वं विकलत्वेन, सदा सोपद्रवं नृणाम् ॥४२॥

यन्नाम्नः प्रथमाक्षरं विजयते भानौ, द्वितीयाक्षरं
नृत्यं नृत्यति सत्कवीन्द्रवदने, भूत्वांत्यवर्णद्वयम् ।
रामो रावणमाजघान समरे, शम्भोः शिरःशालिनी
सा सर्वाक्षरमालिनी **भवतु मे भाग्याय भागीरथी** ॥४३॥
समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महेश्वर्यं लीलाजनितजगतः खण्डपरशोः ।
श्रुतीनां सर्वस्वं, सुकृतमथ मूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥४४॥

एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥४५॥
गङ्गेवाघविनाशिनी, जनमनःसन्तोषवच्चंद्रिका
तीक्ष्णांशोरपि सत्प्रभेव जगदज्ञानान्धकारापहा ।
छायेवाखिलतापनाशनकरी, स्वर्धेनुवत्कामदा
पुण्यैरेव हि लभ्यते सुकृतिभिः **सत्सङ्गतिर्दुर्लभा** ॥४६॥
काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतीः ।
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ॥४७॥
कल्पद्रुमः कल्पितमेव सूते, सा कामधुक्कामितमेव दोग्धि ।
चिन्तामणिश्चिन्तितमेव दत्ते, **सतां हि सङ्गः सकलं प्रसूते**॥४८

जाड्यं धियो हरति, सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति, पापमपाकरोति ।
चेतः प्रसादयति, दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥४९॥

विश्वाभिरामगुणगौरवगुम्फितानां
दोषोऽपि निर्मलधियां रमणीय एव ।
लोकप्रियैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि नितान्तरम्या ॥५०॥

तृषार्तैः सारंगैः प्रतिजलधरं भूरि विरुतं
घनैर्मुक्ता धाराः सपदि पयसस्तान् प्रति मुहुः ।
खगानां के मेघाः, क इह विहगा वा जलमुचा-
मयाच्ञो नार्तानामनुपकरणीयो न महताम् ॥५१॥

कविः करोति पद्यानि लालयत्युत्तमो जनः ।
तरुः प्रसूते पुष्पाणि मरुद्वहति सौरभम् ॥५२॥

उत्कृष्टमध्यमनिकृष्टजनेषु मैत्री
यद्वच्छिलासु सिकतासु जलेषु रेखा ।
वैरं क्रमादधममध्यमसज्जनानां
यद्वच्छिलासु सिकतासु जलेषु रेखा ॥५३॥

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥५४॥

दृश्यन्ते भुवि भूरिनिम्बतरवः, कुत्राऽपि ते चन्दनाः

पाषाणैः परिपूरिता वसुमती, वज्रो मणिर्दुर्लभः ।
शूर्यन्ते करटारवाः प्रतिदिनं, चैत्रे कुहूकूजितं
तन्मध्ये खलसंकुलं जगदिदं, **द्वित्राः क्षितौ सज्जनाः ॥५५॥**

नारिकेलसमाकारा दृश्यन्तेऽपि हि सज्जनाः ।
अन्ये बदरिकाकारा बहिरेव मनोहराः ॥५६॥

करे श्लाघ्यस्त्यागः, शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी, विजयिभुजयोर्वीर्यमतुलम् ।
हृदि स्वस्था वृत्तिः, श्रुतमधिगतैकव्रतफलं
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥५७॥

मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥५८॥

आपत्स्वेव हि महतां शक्तिरभिव्यज्यते, न संपत्सु ।
अगुरोस्तथा न गन्धो घ्राणेऽस्ति, यथाग्निपतितस्य ॥५९॥

प्राज्ञो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद्वाक्यमादत्ते, हंसः क्षीरमिवाम्भसः ॥६०॥

आरभन्तेऽल्पमेवाज्ञाः, कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥६१॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।

गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति, **सतां मैत्री पुनस्त्वीदृशी** ॥६२॥
को हि तुलामधिरोहति शुचिना दुग्धेन सहजमधुरेण ।
तप्तं विकृतं मथितं तथापि यत्स्नेहमुद्विरति ॥६३॥
न क्वचिच्च बहिर्यान्ति मानिनां प्रार्थनागिरः ।
यदि निर्यातुमिच्छन्ति तदा प्राणपुरःसराः ॥६४॥
मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः ।
पंकच्छिदः फलस्येव निकषेणाविलं पयः ॥६५॥
सत्संगाद्भवति हि साधुता खलानां
साधूनां न हि खलसंगमात्खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गंधं न हि कुसुमानि धारयन्ति ॥६६॥
तुंगासनास्तुंगतराः समर्था मनोरथान्पूरयितुं, न नीचाः ।
धाराधरा एव धराधराणां निदाघदाहं शमितुं, न नद्यः ॥६७॥
क्व सरसि वनखंडं पङ्कजानां, क्व सूर्यः
क्व च कुमुदवनाली, कौमुदीबन्धुरिन्दुः ।
चिरपरिचयबन्धाः प्रायशः सज्जनानां
न हि विचलति मैत्री दूरतोऽपि स्थितानाम् ॥६८॥
उत्तमो नातिवक्ता स्यादधमो बहुभाषकः ।
न हि स्वर्णे ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते ॥६९॥
वनेऽपि सिंहा मृगमांसभुक्ता बुभिक्षिता नैव तृणं चरन्ति ।

एवं कुलीना व्यसनाभिभूता **न नीतिमार्गं परिलङ्घयन्ति** ॥७०॥
स एव धन्यो, विपदि यः स्वरूपं न मुञ्चति ।
त्यजत्यर्ककरैस्तप्तं हिमं देहं, न शीतताम् ॥७१॥
मनस्वी म्रियते कामं, कार्पण्यं न तु गच्छति ।
अपि निर्वाणमायाति, नानलो याति शीतताम् ॥७२॥
किं कूर्मस्य भरव्यथा न वपुषि, क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किंत्वंगीकृतमुत्सृजन्कृपणवत् श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥७३॥
किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥७४॥
ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते हि जनः ॥७५॥
न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयूखैरभ्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति ॥७६॥
अर्थः, सुखं, कीर्तिरपीह मा भूदनर्थ एवास्तु, तथापि धीराः ।
निजप्रतिज्ञामधिरूढमाना महोद्यमाः कर्म समारभन्ते ॥७७॥
अङ्गनवेदी वसुधा, कुल्या जलधिः, स्थली च पातालम् ।
वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य धीरस्य ॥७८॥

रत्नैर्महार्हैस्तुतुषुर्न देवा, न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं, **न निश्चितार्थाद्विरमन्ति धीराः**॥७९॥
पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः, **परोपकाराय सतां विभूतयः**८०

खलः कापट्यदोषेण दूरेणैव विसृज्यते ।
अपायशङ्किभिर्लोके विषेणाशीविषो यथा ॥८१॥
अतिमात्रबलेषु चापलं विदधानः कुमतिर्विनश्यति ।
त्रिपुरद्विषि वीरतां वहन्नवलिप्तः कुसुमायुधो यथा ॥८२॥
यः परस्य विषमं विचिन्तयेत्प्राप्नुयात्स कुमतिः स्वयं हि तत् ।
पूतना हरिवधार्थमाययौ, प्राप सैव वधमात्मनस्ततः ॥८३॥
भिन्नस्वरमुखवर्णः, शङ्कितदृष्टिः, समुत्पतिततेजाः ।
भवति हि पापं कृत्वा स्वकर्मसंत्रासितः पुरुषः ॥८४॥
क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये ॥८५॥
गुणायन्ते दोषाः सुजनवदने, दुर्जनमुखे
गुणा दोषायन्ते, तदिदमपि नो विस्मयपदम् ।
महामेघः क्षारं पिबति, कुरुते वारि मधुरम्
फणी क्षीरं पीत्वा वमति गरलं दुःसहतरम् ॥८६॥

अगाधजलसंचारी न गर्वं याति रोहितः ।
अंगुष्ठोदकमात्रेण शफरी फर्फरायते ॥८७॥
निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभं शंखमपि पीतम् ॥८८॥
सुपूरा स्यात्कुनदिका, सुपूरो मूषकाञ्जलिः ।
सुसन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥८९॥
मृतस्य लिप्सा, कृपणस्य दित्सा, विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः, कुटिलस्य मैत्री, विधातृसृष्टौ न हि दृष्टपूर्वा ॥९०॥
जिह्वैकैव सतामुभे फणवतां, स्रष्टुश्चतस्रश्च ता-
स्ताः सप्तैव विभावसोर्नियमिताः, षट् कार्तिकेयस्य च ।
पौलस्त्यस्य दशाभवन्, फणिपतेर्जिह्वासहस्रद्वयं
जिह्वालक्षशतैककोटिनियमो नो दुर्जनानां मुखे ॥९१॥
अनुसरति करिकपोलं भ्रमरः श्रवणेन ताड्यमानोऽपि ।
गणयति न तिरस्कारं दानान्धविलोचनो नीचः ॥९२॥
अप्यात्मनो विनाशं गणयति न खलः परव्यसनहृष्टः ।
प्रायो मस्तकनाशे समरमुखे नृत्यति कबन्धः ॥९३॥
सुमुखोऽपि, सुवृत्तोऽपि, सन्मार्गे पतितोऽपि च ।
महतां पादलग्नोऽपि व्यथयत्येव कण्टकः ॥९४॥
कोऽर्थान्प्राप्य न गर्वितो, विषयिणः कस्यापदोऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः, को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरान्तरगतः, कोऽर्थी गतो गौरवं

को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ? ॥९५॥
पोतो दुस्तरवारिराशितरणे, दीपोन्धकारागमे
निर्वाते व्यजनं, मदान्धकरिणां दर्पोपशान्त्यै शृणिः ।
इत्थं तद्भुवि नास्ति, यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः ॥९६॥
अरण्यरुदितं कृतं, शवशरीरमुद्वर्तितं
स्थलेऽब्जमवरोपितं, सुचिरमूषरे वर्षितम् ।
श्वपुच्छमवनामितं, बधिरकर्णजापः कृतो
धृतोऽन्धमुखदर्पणो, यदबुधो जनः सेवितः ॥९७॥
न मद्यं मादकं तादृक्कान्ता नापि च काञ्चनम् ।
यथेदमविवेकत्वं प्रत्यक्षेणानुभूयते ॥९८॥
वरमहिमुखे क्रोधाध्माते करो विनिवेशितो
विषमपि वरं पीत्वा सुप्तं कृतान्तनिवेशने ।
गिरिवरतटीमुक्तश्चात्मा वरं शतधा कृतो
न तु खलजनाबाधैरर्थैः कृतं हितमात्मनः ॥९९॥
करोति स्वमुखेनैव बहुधान्यस्य खण्डनम् ।
नमः पतनशीलाय मुसलाय, खलाय च ॥१००॥
मुखं पद्मदलाकारं, वाचा चन्दनशीतला ।
हृदयं क्रोधसंयुक्तं, त्रिविधं धूर्तलक्षणम् ॥१०१॥
निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जनः ।
चिरमग्नो जलनिधौ मैनाक इव मार्दवम् ॥१०२॥

नन्वाश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये, वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥१०३॥
शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधोऽधो गङ्गेयं पदमनुगता स्तोकमधुना
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥१०४॥
मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥१०५॥
क्व वाम्भोधौ जन्म, क्व च वपुरिदं कुन्दधवलं
क्व चावासस्थानं कृतमहह विष्णोः करतलम् ।
क्व नीचानामास्ये परिणतिरियं चुम्बनविधा-
वितीवायं शङ्खः करुणकरुणं रोदिति मुहुः ॥१०६॥
क्षीणः क्षीणः समीपत्वं, पूर्णः पूर्णोऽतिदूरताम् ।
उपैति मित्राद्यश्चन्द्रो युक्तं तन्मलिनात्मनः ॥१०७॥
घातयितुमेव नीचः परकार्यं वेत्ति, न प्रसाधयितुम् ।
पातयितुमेव शक्तिर्नखोरुद्धर्तुमब्धपुटम् ॥१०८॥
खलः सत्क्रियमाणोऽपि ददाति कलहं सताम् ।
दुग्धपुष्टोऽपि किं याति वायसः कलहंसताम् ? ॥१०९॥
खलानां धनुषां चापि सद्वंशजनुषामपि ।

गुणलाभो भवेदाशु परद्वेषैदकारकः ॥११०॥
जन्मप्रभृति वक्रस्य हलस्य खलस्य च ।
सोढुं तयोर्मुखाक्षेपं भवत्येकैव सा क्षमा ॥१११॥
बहुनिष्कपटद्रोही बहुधान्योपघातकः ।
रन्ध्रान्वेषी च सर्वत्र दूषको मूषको यथा ॥११२॥
पिशुनत्वमेव विद्या, परदूषणमेव भूषणं येषाम् ।
परदुःखमेव सौख्यं, शिव शिव ते केन वेधसा सृष्टाः ॥११३॥
खलास्तु दूरतस्त्याज्याः कण्टका इव सर्वथा ।
येषां क्षणिकयोगेन सन्मार्गोऽप्यतिदुःखदः ॥११४॥
त्यजति च गुणान् सुदूरं, तनुमपि दोषं निरीक्ष्य गृह्णाति ।
मुक्तालंकृतकेशान्, यूकामिव वानरः पिशुनः ॥११५॥

दैवे समर्प्य चिरसञ्चितकर्मजालं
सुस्थाः सुखं वसत, किं परयाचनाभिः ।
मेरुं प्रदक्षिणयतोऽपि दिवाकरस्य
ते तस्य सप्त तुरगा न कदाचिदष्टौ ॥११६॥
दैवे विमुखतां याते न कोऽप्यस्ति सहायवान् ।
पिता माता तथा भार्या भ्राता वाऽथ सहोदरः ॥११७॥
स्वयं महेशः, श्वशुरो नगेशः, सखा धनेशस्तनयो गणेशः ।
तथापि भिक्षाटनमेव शम्भोर्बलीयसी केवलमीश्वरेच्छा ॥११८॥
नैवाकृतिः फलति, नैव कुलं, न शीलं

विद्यापि नैव, न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा किल संचितानि
काले फलन्ति पुरुषस्य, यथैव वृक्षाः ॥११९॥
यत्राकुण्ठितदन्तिदन्तमुसलान्याचूर्णितान्याहवे
धारा यत्र पिनाकपाणिपरशोराकुण्ठिता वक्षसि ।
तन्मे तावदुरो नृसिंहकरजैर्न्यादीर्यते साम्प्रतं
दैवे दुर्जनतां गते तृणमपि प्रायेण वज्रायते ॥१२०॥
सच्छिद्रो मध्यकुटिलः कर्णः स्वर्णस्य भाजनम् ।
धिग्दैवं विमृशे नेत्रे पात्रं कज्जलभस्मनः ॥१२१॥
शशिदिवाकरयोर्ग्रहपीडनं,
गजभुजंगमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां,
विधिरहो बलवानिति मे मतिः ॥१२२॥
ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने, तस्मै नमः कर्मणे ॥१२३॥
पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासम्भवो लक्षितः ।
अक्षैश्चापि युधिष्ठिरेण रमता ज्ञातो न दोषः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मति क्षीयते ॥१२४॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां, मेरौ ततो नाधिकम् ।
तद्धीरो भव, वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृण्हाति तुल्यं जलम् ॥१२५॥
भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत, दैवमेव हि नृणां वृद्धिक्षये कारणम्॥१२६॥
चातकस्य मुखचंचुसम्पुटे नो पतन्ति यदि वारिबिन्दवः ।
सागरीकृतमहीतलस्य किम् दोष एव जलदस्य दीयते ॥१२७॥
विधौ विरुद्धे न पयः पयोनिधौ, सुधौघसिंधौ न सुधा सुधाकरे ।
न वाञ्छितं सिध्यति कल्पपादपे, न हेम हेमप्रभवे गिरावपि १२८
अलिरनुसरति परिमलं, लक्ष्मीरनुसरति नयगुणसमृद्धम् ।
निम्नमनुसरति सलिलं, विधिलिखितं बुद्धिरनुसरति ॥१२९॥
यशः, पुण्यं, कलत्राणि, पुत्रोत्पत्तिर्निधिस्तथा ।
सुकृतादेव लभ्यन्ते, न च पार्थ पराक्रमात् ॥१३०॥
उच्चीयन्ते स्म वेश्मन्यशनविरहिते निर्धने श्रोत्रियाणां
यत्र श्यामाकबीजान्यपि चटकवधूचंचुकोटिच्युतानि ।
दैवे दातर्यकस्माच्चपलशिशुकराकृष्टमुक्तावलीक-
भ्रष्टास्तत्रैव दृष्टा युवतिभिरलसं घूर्णिता मौक्तिकौघाः ॥१३१॥
पयोधेः सर्वस्वं, शिरसि धृतवान् यं नृपगणः

पणो यस्य क्षोणी चतुरुदधिसीमावधिरभूत् ।
स एवायं दैवाच्छबरवनितापाणिपतितो
मणिर्मेषग्रीवाद्विगुणगुणबद्धो विहरति ॥१३२॥
तुष्टोऽपि राजा यदि सेवकेभ्यो भाग्यात्परं नैव ददाति किञ्चित् ।
अहर्निशं वर्षति वारिवाहस्तथापि पत्त्रित्रितयः पलाशः ॥१३३॥
कर्मणा जायते जन्तुः कर्मणैव हि लीयते ।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥१३४॥
यस्मै ददाति विवरं भूमिः फूत्कारमात्रभीतेव ।
आशीविषः स दैवाद्ढौम्बकरण्डे स्थितिं लेभे ॥१३५॥
भ्रष्टं नृपतिकिरीटाद्भूमौ पतितं, तिरोहितं रजसा ।
विधिविलसितेन रत्नं जनचरणविडम्बनं सहते ॥१३६॥
संप्राप्तोऽपि महोदधिं न वितृषो जातो जलैर्वाडवो
मेघं प्राप्य च चातकोऽपि, चरणौ भानुं न लेभेऽरुणः ।
चंद्रः शंकरशेखरेऽपि सततं सोऽपि क्षयी दृश्यते
प्रायः सत्पुरुषाश्रितोऽपि लभते दैवानुरूपं फलम् ॥१३७॥
मध्ये ज्या त्रुटिता, शरासनमहो भग्नं, दवाग्नेर्भया-
न्निर्यातः शबरः शुना सह गतो, दग्धाश्च पाशास्ततः ।
मेघस्तत्र समागतो विधिवशात्तेनातिशान्तं वनं
श्रीकृष्णस्य कृपालवो यदि भवेत्कः कं निहन्तुं क्षमः ॥१३८॥
खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ।

तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥१३९॥
लुलाये गोमायौ मृगपरिषदि श्वापदकुले
करिष्यन्कार्पण्यं किमिह महिमानं गमयसि ।
निमग्नः पङ्केऽस्मिन्ननुभव करीन्द्राधिप दशा-
मभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ॥१४०॥
कैवर्तकर्कशकरग्रहणच्युतोऽपि
जालान्तरे निपतितः शफरो वराकः ।
दैवात्ततो विगलितो गिलितो बकेन,
वक्रे विधौ वद कथं व्यवसायसिद्धिः ॥१४१॥
कान्तं वक्ति कपोतिकाऽकुलतया नाथान्तकालोऽधुना
व्याधोऽधो धृतचापसज्जितशरः श्येनः परिभ्राम्यति ।
इत्थं सत्यहिना स दष्ट इषुणा, श्येनोऽपि तेनाहत-
स्तूर्णं तौ तु यमालयं प्रति गतौ, **दैवी विचित्रा गतिः** ॥१४२॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥१४३॥

जानन्ति पशवो गन्धाद्वेदाज्जानन्ति पण्डिताः ।
चाराज्जानन्ति **राजानश्चक्षुभ्यामितरे** जनाः ॥१४४॥
श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः ।
राज्ञा सभासदः कार्या, रिपौ मित्रे च ये समाः ॥१४५॥

दयामास्थाय परमां धर्मादविचलन्नृपः ।
पीडितानामनाथानां कुर्यादश्रुप्रमार्जनम् ॥१४६॥
सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः ।
प्रायशो यैर्विनश्यन्ति कृतमूला अपीश्वराः ॥१४७॥
स्त्रियोऽक्षा, मृगया, पानं, वाक्पारुष्यं च पञ्चमम् ।
महच्च दण्डपारुष्यमर्थदूषणमेव च ॥१४८॥
राजाश्रयस्तरस्करताश्वपण्यमाथर्वणं चापि समुद्रयानम् ।
एतानि सिध्यन्ति महाफलानि, विपर्यये प्राणहराणि पञ्च ॥१४९॥
सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुररत्नधनागमा च
वारांगनेव नृपनीतिरनेकरूपा ॥१५०॥
राज्ये न हि सुखं, दुःखं सन्धिविग्रहचिन्तया ।
पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम् ॥१५१॥
मान्धाता च महीपतिः कृतयुगालंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वाऽसौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति ॥१५२॥
सस्यानि स्वयमत्ति चेद्वसुमती, माता सुतं हन्ति चे-
द्वेलामम्बुनिधिर्विलंघयति चेद्भूमिं दहेत्पावकः ।
आकाशं जनमस्तके पतति चेदन्नं विषं चेद्भवे-

दन्यायं कुरुते यदा क्षितिपतिः कस्तं निरोद्धुं क्षमः ॥१९३॥
माता यदि विषं दद्याद्विक्रीणाति पिता सुतम् ।
राजा हरति सर्वस्वं, तत्र कां परिदेवनाः॥१९४॥
अबला यत्र प्रबला, बालो राजा, निरक्षरो मन्त्री ।
न हि न हि तत्र धनाशा, जीविताशापि दुर्लभा भवति ॥१९५॥
जवो हि सप्तेः परमं विभूषणं
त्रपाङ्गनायाः, कृशता तपस्विनः ।
द्विजस्य विद्या, नृपतेरपि क्षमा
पराक्रमः शस्त्रबलोपजीविनाम् ॥१९६॥
यथा ह्यनुदका नद्यो, यथा वाप्यतृणं वनम् ।
अगोपालो यथा गावस्तथा राष्ट्रमराजकम् ॥१९७॥
नाराजके जनपदे स्वकं भवति कस्यचित् ।
मत्स्या इव जना नित्यं भक्षयन्ति परस्परम् ॥१९८॥
अहो तम इवेदं स्यात्, न प्रज्ञायेत किञ्चन ।
राजा चेन्न भवेल्लोके विभजन्साध्वसाधुनी ॥१९९॥
भानुः सकृद्युक्ततुरंग एव, रात्रिं दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः, षष्ठांशवृत्तेरपि धर्म एषः ॥१६०॥
स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥१६१॥

यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥१६२॥

चलं चित्तं, चलं वित्तं, चले जीवितयौवने ।
चलाचलमिदं सर्वं, **कीर्तिर्यस्य स जीवति** ॥१६३॥
अस्थिरं जीवितं लोके, चास्थिरे धनयौवने ।
अस्थिराः पुत्रदाराश्च, **धर्मः कीर्तिर्द्वयं स्थिरम्** ॥१६४॥
अन्यमाश्रयते लक्ष्मीस्त्वन्यमन्यं च मेदिनी ।
अनन्यगामिनी पुंसां कीर्तिरेका पतिव्रता ॥१६५॥
का विद्या कवितां विनाऽर्थिनि जने त्यागं विना श्रीश्च का
कः सूनुर्विनयं विना, कुलवधूः का स्वामिभक्तिं विना ।
को धर्मः स दयां विना, नरपतिः को नाम नीतिं विना
भोगाः के रमणीं विना, **क्षितितले किं जन्म कीर्तिं विना** १६६
देहे पातिनि का रक्षा, यशो रक्ष्यमपातवत् ।
नरः पतितकायोऽपि यशःकायेन जीवति ॥१६७॥
सुकुलजन्म, विभूतिरनेकधा, प्रियसमागमसौख्यपरंपरा ।
नृपकुले गुरुता, विमलं यशो, भवति पुण्यतरोः फलमीदृशम् १६८

आचारः प्रथमो धर्मो नृणां श्रेयस्करो महान् ।
इहलोके परा कीर्तिः, परत्र परमं सुखम् ॥१६९॥
यस्मिन्देशे य आचारः, स्थाने स्थाने यथा स्थितिः ।

तथैव व्यवहर्तव्यं, पारम्पर्यागतो विधिः ॥१७०॥
यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः ।
तथापि लौकिकाचारं मनसापि न लङ्घयेत् ॥१७१॥
स्वगृहे पूर्ण आचारः, परगृहे तदर्धकः ।
तदर्धकः परग्रामे, **पथि सूत्रवदाचरेत्** ॥१७२॥
न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥१७३॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते, लोकस्तदनुवर्तते ॥१७४॥
अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः ।
सर्वे ते हास्यतां यान्ति, यथा ते मूर्खपण्डिताः ।

दरिद्रता धीरतया विराजते, कुवस्त्रता शुभ्रतया विराजते ।
कदन्नता चोष्णतया विराजते, कुरूपता **शीलतया** विराजते १७५
सभा जिता वस्त्रवता, मिष्टाशा गोमता जिता ।
अध्वा जितो यानवता, **सर्वं शीलवता जितम्** ॥१७६॥
वन्हिस्तस्य जलायते, जलनिधिः कुल्यायते तत्क्षणात्
मेरुः स्वल्पशिलायते, मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते, विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥१७७॥
ऐश्वर्यस्य विभूषणं सुजनता, शौर्यस्य वाक्संयमो

ज्ञानस्योपशमः, कुलस्य विनयो, वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः, क्षमा बलवतां, धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं **शीलं परं भूषणम्** ॥१७८॥

षडेव तु **गुणाः** पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥१७९॥
गुणिनां निर्गुणानां च दृश्यते महदन्तरम् ।
हारः कण्ठगतः स्त्रीणां, नूपुराणि च पादयोः ॥१८०॥
अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥१८१॥
अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च, दानं यथाशक्ति, कृतज्ञता च ॥१८२॥
शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥१८३॥
गुणवानपि चिरंजीवी, सधनो विनतः, सती विदग्धा स्त्री ।
हरिभक्तोऽपि धनाढ्यः, क्षमातले न श्रुतं, न वा दृष्टम् ॥१८४॥
गुणेषु क्रियतां यत्नः, किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥१८५॥
यदि सन्ति गुणाः पुसां विकसन्त्येव ते स्वयम् ।
न हि कस्तूरिकामोदः शपथेन विभाव्यते ॥१८६॥
दोषमपि गुणवति जने दृष्ट्वा गुणरागिणो न खिद्यन्ते ।

प्रीत्यैव शशिनि पतितं पश्यति लोकः कलंकमपि ॥१८७॥
गुणवज्जनसंसर्गाद्याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते ॥१८८॥
गुणिनोऽपि सन्ति बहवो, गुणवेत्तारः सुदुर्लभा जगति ।
हिमकररसरसज्ञे रसनाचतुराश्चकोरका एव ॥१८९॥
शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति ।
शिशुत्वं स्त्रैणं वा भवतु, ननु वन्द्यासि जगति
गुणाः पूजास्थानं गुणिषु, न च लिङ्गं न च वयः १९०
स्थिरा शैली गुणवतां खलबुध्या न बाध्यते ।
रत्नदीपस्य हि शिखा वात्ययाऽपि न नाश्यते ॥१९१॥

यत्रास्ति **लक्ष्मी**र्विनयो न तत्र, ह्यभ्यागतो यत्र न तत्र लक्ष्मीः ।
उभौ च तौ यत्र न तत्र विद्या, नैकत्र सर्वो गुणसन्निपातः॥१९२॥
पद्मे, मूढजने ददासि द्रविणं, विद्वत्सु किं मत्सरो ?
नाहं मत्सरिणी, न चापिचपला, नैवास्ति मूर्खे रतिः ।
मूर्खेभ्यो द्रविणं ददामि नितरां, तत्कारणं श्रूयतां
विद्वान्सर्वजनेषु पूजिततनुर्मूर्खस्य नान्या गतिः ॥१९३॥
किं तया सुमहत्यापि श्रिया देशान्तरस्थया ।
रिपवो यां न पश्यन्ति, सुहृद्भिर्या न भुज्यते ॥१९४॥
समायाति यदा लक्ष्मीर्नारिकेलफलाम्बुवत् ।

विनिर्याति यदा लक्ष्मीर्गजभुक्तकपित्थवत् ॥१९५॥
उत्साहसम्पन्नमदीर्घसूत्रं, क्रियाविधिज्ञं, व्यसनेष्वसक्तम् ।
शूरं, कृतज्ञं, दृढसौहृदं च, लक्ष्मीः स्वयं मार्गति वासहेतोः॥१९६॥
आलस्यं स्थिरतामुपैति, भजते चापल्यमुद्योगितां
मूकत्वं मितभाषितां वितनुते, मौढ्यं भवेदार्जवम् ।
पात्रापात्रविचारणाविरहिता यच्छत्युदारात्मतां
मार्तर्लक्ष्मि, तव प्रसादवशतो दोषा अपि स्युर्गुणाः ॥१९७॥
अशठमलोभमजिह्मं, त्यागिनमनुरागिणं, विशेषज्ञम् ।
यदि नाश्रयति नरं श्रीः सैव हि वञ्चिता तत्र ॥१९८॥
प्रामाण्यबुद्धिः स्तोत्रेषु, देवताबुद्धिरात्मनि ।
कीटबुद्धिर्मनुष्येषु नूतनायाः श्रियः फलम् ॥१९९॥
यत्राभ्यागतदानमानचरणप्रक्षालनं भोजनं
सत्सेवा, पितृदेवतार्चनविधिः, सत्यं, गवां पालनम् ।
धान्यानामपि संग्रहो, न कलहश्चित्तानुरूपा प्रिया
हृष्टा प्राह हरिं वसामि कमला तस्मिन् गृहे निश्चला ॥२००॥
शूरं त्यजामि वैधव्यादुदारं लज्जया पुनः ।
सापत्न्यात्पण्डितमपि, तस्मात्कृपणमाश्रये ॥२०१॥
हंसाः सर्वागशुचयः पद्मेभ्यो बहिरासते ।
अन्तर्विशन्ति मधुपाः, श्रीमतां गतिरीदृशी ॥२०२॥
आजन्मानुगतेऽप्यस्मिन्नाले विमुखमम्बुजम् ।
प्रायेण गुणपूर्णेषु रीतिर्लक्ष्मीवतामियम् ॥२०३॥

आपद्गतं हससि किं द्रविणान्धमूढ
लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ।
एतान्प्रपश्यसि घटाञ्जलयन्त्रचक्रे
रिक्ता भवन्ति भरिता, भरिताश्च रिक्ताः ॥२०४॥
पीतः क्रुद्धेन तातश्चरणतलहतो वल्लभोऽन्येन रोषा-
दाबाल्याद्विप्रवर्यैःस्ववदनविवरे धार्यते वैरिणी मे ।
गेहं मे छेदयन्ति प्रतिदिवसमुमाकान्तपूजानिमित्तं
तस्मात्खिन्ना सदाऽहं द्विजकुलनिलयं नाथ नित्यं त्यजामि ॥२०५॥
लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ।
शेषे धराभरक्रान्ते शेते नारायणः सुखम् ॥२०६॥
वाक्चक्षुःश्रोत्रलयं लक्ष्मीः कुरुते, नरस्य को दोषः ?
गरलसहोदरजाता न मारयति यच्च, तच्चित्रम् ॥२०७॥
न विद्यया, नैव कुलेन गौरवं, जनानुरागो धनिकेषु सर्वदा ।
कपालिना मौलिधृताऽपि जाह्नवी प्रयाति रत्नाकरमेव सत्वरम्२०८
त्यजन्ति मित्राणि धनैर्विहीनं, पुत्राश्च दाराश्च सुहृज्जनाश्च ।
तमर्थवन्तं पुनराश्रयन्ति, **ह्यर्थो हि लोके पुरुषस्य बन्धुः २०९**
माता निन्दति, नाभिनन्दति पिता, भ्राता न संभाषते
भृत्यः कुप्यति, नानुगच्छति सुतः, कान्ता च नालिङ्गते ।
अर्थप्रार्थनशङ्कया न कुरुतेऽप्यालापमात्रं सुहृत्,
तस्माद्द्रव्यमुपार्जयाशु, सुमते, **द्रव्येण सर्वे वशाः ॥२१०॥**
गुणयुक्तोऽप्यधो याति रिक्तः, कूपे यथा घटः ।

निर्गुणोऽपि भृतः पश्य जनैः शिरसि धार्यते ॥२११॥
अर्थो नराणां, पतिरंगनानां, वर्षा नदीनामृतुराट् तरूणाम् ।
स्वधर्मचारी नृपतिः प्रजानां गतं गतं यौवनमानयन्ति ॥२१२॥
कृपणोऽप्यकुलीनोऽपि सज्जनैर्वर्जितः सदा ।
सेव्यते स नरो लोके, यस्य स्याद्वित्तसञ्चयः ॥२१३॥
न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो ।
मुनेरपि वनस्थस्य मनश्चलति दर्शनात् ॥२१४॥
दुन्दुभिस्तु सुतरामचेतनस्तन्मुखादपि धनं, धनं, धनम् ।
इत्थमेव निनदः प्रवर्तते, किं पुनर्यदि जनः सचेतनः ॥२१५॥
पतन्ति खड्गधारासु, विशन्ति मकरालयम् ।
किं न कुर्वन्ति सुभगे कष्टमर्थार्थिनो जनाः ॥२१६॥
लभेद्यदयुतं धनं तदधनं धनं यद्यपि
लभेत नियुतं धनं निधनमेव तज्जायते ।
तथा धनपरार्धकं तदपि भावहीनात्मकं
यदक्षरपदद्वयान्तरगतं धनं तद्धनम् ॥२१७॥

दारिद्र्य, शोचामि भवन्तमेवमस्मच्छरीरे सुहृदित्युषित्वा ।
विपन्नदेहे मयि मन्दभाग्ये, ममेति चिन्ता, क्व गमिष्यसि त्वम् २१८
दग्धं खाण्डववनमर्जुनेन बलिना दिव्यैर्द्रुमैः सेवितं
दग्धा वायुसुतेन रावणपुरी लङ्का पुनः स्वर्णभूः ।
दग्धः पञ्चशरः पिनाकपतिना तेनाप्ययुक्तं कृतं

दारिद्र्यं जगतापकारकमिदं केनापि दग्धं न हि ॥२१९॥
परीक्ष्य सत्कुलं विद्यां शीलं शौर्यं सुरूपताम् ।
विधिर्ददाति निपुणः कन्यामिव दरिद्रताम् ॥२२०॥
अहो नु कष्टः सततं प्रवासस्ततोऽतिकष्टः परगेहवासः ।
कष्टाधिका नीचजनस्य सेवा, ततोऽतिकष्टा धनहीनता च ॥२२१॥
हेतुप्रमाणयुक्तं वाक्यं न श्रूयते दरिद्रस्य ।
अप्यतिपुरुषमसत्यं पूज्यं वाक्यं समृद्धस्य ॥२२२॥
वासः प्रधानं खलु योग्यताया, वासोविहीनं विजहाति लक्ष्मीः ।
पीताम्बरं वीक्ष्य ददौ तनूजां, दिगम्बरं वीक्ष्य विषं समुद्रः ॥२२३॥
शय्या, वस्त्रं, चन्दनं, चारुहास्यं, वीणावाणी दृश्यते या च नारी ।
न भ्राजन्ते क्षुत्पिपासातुराणाम् **सर्वारम्भास्तण्डुलप्रस्थमूलाः** ॥
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोरिति यो बभाषे ।
नूनं न दृष्टं कविनापि तेन दारिद्र्यदोषो गुणराशिनाशी ॥२२५॥
शक्तिं करोति संचारे, शीतोष्णे मर्षयत्यपि ।
दीपयत्युदरे वह्निं, **दारिद्र्यं परमौषधम्** ॥२२६॥
शूली जातः कदशनवशाद्भिक्ष्ययोगात्कपाली
वस्त्राभावाद्भगनवसनः स्नेहशून्याज्जटावान् ।
इत्थं राजंस्तव परिचयादीश्वरत्वं मयाप्तं
तस्मान्मह्यं किमिति कृपया नार्धचन्द्रं ददासि ॥२२७॥
दारिद्र्यानलसन्तापः शान्तः सन्तोषवारिणा ।
याचकाशाविघातान्तर्दाहः केनोपशाम्यतु ॥२२८॥

पदस्थितस्य पद्मस्य मित्रे वरुणभास्करौ ।
पदच्युतस्य तस्यैव क्लेशदाहकरावुभौ ॥२२९॥
भुक्तानि यैस्तव फलानि पचेलिमानि
क्रोडस्थितैरहह वीतभयैः प्रसुप्तम् ।
ते पक्षिणो जलरयेण विकृष्यमाणं
पश्यन्ति, पादप, भवन्तममी तटस्थाः ॥२३०॥
वरं वनं व्याघ्रगजादिसेवितं जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं, **न बन्धुमध्ये धनहीनजीवितम्**
नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य ।
घृततैललवणतण्डुलवस्त्रेन्धनचिन्तया सततम् ॥२३१॥

भार्यावियोगः, स्वजनापवादः, **ऋणस्य** शेषः, कृपणस्य सेवा ।
दारिद्र्यकाले प्रियदर्शनं च विनाग्निना पञ्च दहन्ति कायम् ॥२३२॥
लोकद्वयप्रतिभयैकनिदानमेत-
द्धिक् प्राणिनामृणमहो परिणामघोरम् ।
एकः स एव हि पुमान् परमस्त्रिलोके
ऋद्धस्य येन धनिकस्य मुखं न दृष्टम् ॥२३३॥
इदमेव हि पाण्डित्यं, चातुर्यमिदमेव हि ।
इदमेव सुबुद्धित्वं, आयादल्पतरो व्ययः ॥२३४॥
अधिकारं च गर्भं च ऋणं च श्वानमैथुनम् ।
आगमे सुखमाप्नोति, निर्गमे प्राणसंकटम् ॥२३५॥

अन्तकोऽपि हि जन्तूनामन्तकालमुपेक्षते ।
न कालनियमः कश्चिदुत्तमर्णस्य विद्यते ॥२३६॥
न पश्यामो मुखे दंष्ट्रां, न पाशं वा कराञ्चले ।
उत्तमर्णमवेक्ष्यैव तथाप्युद्विजते जनः ॥२३७॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्ववतां **न खलु वयस्तेजसो हेतुः** ॥२३८॥
पादाहतं समुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवावमानेऽपि देहिनस्तद्वरं रजः ॥२३९॥
एकचक्रो रथो, यन्ता विकलो, विषमा हयाः ।
आक्रमत्येव तेजस्वी तथाप्यर्को नभस्थलम् ॥२४०॥
हस्ती स्थूलतनुः, स चाङ्कुशवशः, किं हस्तिमात्राऽङ्कुशः
वज्रेणाभिहताः पतन्ति गिरयः, किं शैलमात्रः पविः ।
दीपे प्रज्वलिते विनश्यति तमः, किं दीपमात्रं तम-
स्तेजो यस्य विराजते स बलवान्, स्थूलेषु कः प्रत्ययः ॥२४१॥
शमयति गजानन्यान् गंधद्विपः कलभोऽपि सन्
भवति सुतरां वेगोदग्रं भुजंगशिशोर्विषम् ।
भुवनमधिपतिर्बालावस्थोऽप्यलं परिरक्षितुं
न खलु वयसा ज्ञायैवायं स्वकार्यसहो भरः ॥२४२॥
पततु नभसो, गच्छत्वस्तं, निमज्जतु वारिधौ
व्रजतु वरुणागारद्वारं प्रभाभिरनादृतः ।

तदपि तरणिर्दत्वा पादं शिरःसु महीभृतां
दलिततिमिरव्रातः प्रातः पुनः सकृदेष्यति ॥२४३॥
जातःस्तन्यं न जग्राह कंठीरवकिशोरकः ।
चक्षुर्व्यापारयामास कुंजे कुंजरशालिनि ॥२४४॥
बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम् ।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ॥२४५॥

स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ।
घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥२४६॥
अग्राह्यं हृदयं, यथैव वदनं यद्दर्पणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते ।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
नारी नाम विषाङ्कुरैरिव लता दोषैः समं वर्धिता ॥२४७॥
अन्तः क्रूराः, सौम्यमुखा, अगाधहृदयाः स्त्रियः ।
अन्तर्विषा बहिः सौम्या भक्ष्या विषकृता इव ॥२४८॥
स्त्रियो हि मूलं नरकस्य पुंसः, स्त्रियो हि मूलं व्यसनस्य पुंसः ।
स्त्रियो हि मूलं नरकस्य पुंसः, स्त्रियो हि मूलं कलहस्य पुंसः २४९
पिता रक्षति कौमारे, भर्ता रक्षति यौवने ।
पुत्रो रक्षति वार्धक्ये, न स्त्री स्वातन्त्र्यमर्हति ॥२५०॥
अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचत्वं निर्दयत्वं स्त्रीणां दोषाः स्वभावजाः ॥२५१॥

एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः ।
न तासां वल्लभः कोऽपि, सुतोऽपि स्वसुखं विना ॥२५२॥
यदन्तस्तन्न जिव्हायां, यज्जिव्हायां न तद्बहिः ।
यद्बहिस्तन्न कुर्वन्ति, विचित्रचरिताःस्त्रियः ॥२५३॥
अश्वहुतं, माधवगर्जितं च
स्त्रीणां च चित्तं, पुरुषस्य भाग्यम् ।
अवर्षणं चाप्यतिवर्षणं च
देवो न जानाति, कुतो मनुष्यः ॥२५४॥
तावत्स्यात्सुप्रसन्नास्यस्तावद्गुरुजने रतः ।
पुरुषो योषितां यावन्न शृणोति वचो रहः ॥२५५॥
स्त्रियो हि नाम, खल्वेता निसर्गादेव पण्डिताः ।
पुरुषाणां तु पाण्डित्यं शास्त्रेणेवोपदिश्यते ॥२५६॥
ऋषीणां च नदीनां च कुलानां च महात्मनाम् ।
प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च ॥२५७॥
रे रे घरट्ट मा रोदीः, कं कं न भ्रामयन्त्यमूः ।
कटाक्षवीक्षणादेव, कराकृष्टस्य का कथा ॥२५८॥
स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते, किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥२५९॥

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
गृहं तु गृहिणीहीनं कान्तारादतिरिच्यते ॥२६०॥
माता यस्य गृहे नास्ति, भार्या च प्रियवादिनी ।
अरण्यं तेन गन्तव्यं, यथारण्यं तथा गृहम् ॥२६१॥
नित्यं स्नाता, सुगन्धा च, नित्यं च प्रियवादिनी ।
अल्पभुङ् मितवक्त्री च देवता सा, न मानुषी ॥२६२॥
स स्निग्धोऽकुशलान्निवारयति यस्तत्कर्म यन्निर्मलं
सा स्त्री यानुविधायिनी, स मतिमान् यः सद्भिरभ्यर्च्यते ।
सा श्रीर्या न मदं करोति, स सुखी यस्तृष्णया मुच्यते
तन्मित्रं यदकृत्रिमं, स पुरुषो यः खिद्यते नेन्द्रियैः ॥२६३॥
मात्रासमं नास्ति शरीरपोषणं, विद्यासमं नास्ति शरीरभूषणम् ।
भार्यासमं नास्ति शरीरतोषणं, चिन्तासमं नास्ति शरीरशोषणम् ॥
शीलभारवती कान्ता पुष्पभारवती लता ।
अर्थभारवती वाणी भजते कामपि श्रियम् ॥२६५॥
ननान्दा सानन्दा हसितवदनाभूद्बहिनिका
कृतार्था च श्वश्रूः कुपितदृशि पत्यौ मयि, सखि ।
स चेदुच्चैर्ब्रूते कठिनवचनैस्तर्हि सकलाः
करिष्यन्ति प्रायो वसनरहितास्ताण्डवविधिम् ॥२६६॥
पदन्यासो गेहाद्बहिरहिफणारोपणसमो
निजावासादन्यद्भवनमपरद्वीपतुलितम् ।
वचो लोकालभ्यं कृपणधनतुल्यं मृगदृशः

पुमान्यः कान्ताद्विधुरिव चतुर्थांसमुदितः ॥२६७॥
कार्येषु मन्त्री, करणेषु दासी,
भोज्येषु माता, शयनेषु रम्भा ।
धर्मानुकूला, क्षमया धरित्री,
भार्या च षाड्गुण्यवतीह दुर्लभा ॥२६८॥
भक्तिः प्रेयसि, संश्रितेषु करुणा, श्वश्रूषु नम्रं शिरः
प्रीतिर्यातृषु, गौरवं गुरुजने, क्षान्तिः कृतागस्यपि ।
अम्लाना, कुलयोषितां व्रतविधिः सोऽयं विधेयः पुन-
र्भद्भर्तुर्दयिता ह्यिति प्रियसखीबुद्धिः सपत्नीष्वपि ॥२६९॥

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥२७०॥
धनंजये हाटकसंपरीक्षा, महारणे शस्त्रभृतां परीक्षा ।
विपत्तिकाले गृहिणीपरीक्षा, विद्यावतां भागवते परीक्षा ॥२७१॥
आपदि मित्रपरीक्षा, शूरपरीक्षा रणांगणे भवति ।
विनये वंशपरीक्षा, स्त्रियः परीक्षा धनक्षये भवति ॥२७२॥
जानीयात्संगरे भृत्यान्बान्धवान्व्यसनागमे ।
आपत्काले तु मित्राणि, भार्यां च विभवक्षये ॥२७३॥
यस्य भार्या विरूपा च कश्मला कलहप्रिया ।
अधिकाधिकभक्षा च, सा जरा, न जरा जरा ॥२७४॥
नारी परमुखद्रष्ट्री, कविरव्यवहारवित् ।
अपथ्यसेवी रोगी च, कियद्भिर्नोपहास्यते? ॥२७५॥

भार्ये द्वे पुत्रशालिन्यौ, भगिन्यः पतिवर्जिताः ।
अश्रान्तकलहो नाम, योगोऽयं गृहमेधिनाम् ॥२७६॥
दुष्टा भार्या, शठं मित्रं, भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो, मृत्युरेव न संशयः ॥२७७॥

सा भार्या या प्रियं ब्रूते, स **पुत्रो** यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः, स देशो यत्र जीव्यते ॥२७८॥
सन्मित्रं सधनं, स्वयोषिति रतिश्चाज्ञापराः सेवकाः
सानन्दं सदनं, सुताश्च सुधियः, कान्ता मनोहारिणी ।
आतिथ्यं शिवपूजनं प्रतिदिनं, मिष्टान्नपानं गृहे
साधोः सङ्गमुपासते हि सततं, **धन्यो गृहस्थाश्रमः** ॥२७९॥
दिग्वाससं गतव्रीडं जटिलं धूलिधूसरम् ।
पुण्याधिका हि पश्यन्ति गंगाधरमिवात्मजम् ॥२८०॥
धूलिधूसरसर्वांगो विकसद्दन्तकेसरः ।
आस्ते कस्यापि धन्यस्य द्वारि दन्ती गृहेऽर्भकः ॥२८१॥
अन्तःकरणतत्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति कथ्यते ॥२८२॥
यदि रामा, यदि च रमा, यदि तनयो विनयगुणोपेतः ।
तनये तनयोत्पत्तिः, सुरवरनगरे किमाधिक्यम् ॥२८३॥
कुदेशमासाद्य कुतोऽर्थसञ्चयः, कुपुत्रमासाद्य कुतो जलाञ्जलिः ।
कुगेहिनीं प्राप्य गृहे कुतः सुखं, कुशिष्यमध्यापयतः कुतो यशः

अर्थागमो, नित्यमरोगिता च, प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या, षड् जीवलोकस्य सुखानि राजन्॥
कुग्रामवासः कुलहीनसेवा कुभोजनं क्रोधमुखी च भार्या।
पुत्रश्च मूर्खो विधवा च कन्या विनाऽग्निना षट् प्रदहन्ति कायम्॥
लालयेत्पञ्च वर्षाणि, दश वर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवदाचरेत्॥२८७॥
शत्रोरपि गुणा वाच्या, दोषा वाच्या गुरोरपि।
सर्वदा सर्वयत्नेन पुत्रे शिष्ये हितं वदेत्॥२८८॥
प्रत्यक्षे गुरवः स्तुत्याः, परोक्षे मित्रबान्धवाः।
कार्यान्ते दासिभृत्याश्च, पुत्रो नैव, मृताः स्त्रियः॥२८९॥
शर्वरीदीपकश्चन्द्रः, प्रभाते दीपको रविः।
त्रैलोक्ये दीपको धर्मः, **सुपुत्रः कुलदीपकः**॥२९०॥
सर्वत्र जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्।
वासुदेवं नमस्यन्ति, वसुदेवं न ते जनाः॥२९१॥

अर्थो हि **कन्या** परकीय एव, तामद्य संप्रेष्य प्रतिग्रहीतुः।
जातो ममायं विशदोन्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा॥२९२॥
जातेति कन्या महती हि चिन्ता,
कस्मै प्रदेयेति महान्वितर्कः।
दत्ता सुखं यास्यति वा नवेति,
कन्यापितृत्वं खलु नाम नष्टम्॥२९३॥

परस्त्रीस्मरणेनापि कोट्यनर्थागमः क्षणात्।
दृष्टौ कुलादिहन्तारौ हा दुर्योधनरावणौ॥२९४॥
अप्रियं पुरुषं चापि, परद्रोहं, परस्त्रियम्।
अधर्ममनृतं चैव दूरात्प्राज्ञो विवर्जयेत्॥२९५॥
मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये।
परदारेषु वर्तन्ते ते नराः स्वर्गगामिनः॥२९६॥
वरं मौनं कार्यं, न च वचनमुक्तं यदनृतं
वरं क्लैब्यं पुंसां, न च परकलत्राभिगमनम्।
वरं प्राणत्यागो, न च पिशुनवाक्येष्वभिरुचि-
र्वरं भिक्षाशित्वं, न च परधनास्वादनसुखम्॥२९७॥
मातृवत्परदारांश्च परद्रव्याणि लोष्टवत्।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति॥२९८॥
मातृवत्परदाराणि परद्रव्याणि लोष्टवत्।
आत्मवत्सर्वभूतानि वीक्षन्ते धर्मबुद्धयः॥२९९॥
हरणं च परस्वानां परदाराभिमर्षणम्।
सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः॥३००॥
परस्वे निर्ममा नित्यं परदारविवर्जिताः।
धर्मलब्धान्नभोक्तारस्ते नराः स्वर्गगामिनः॥३०१॥
अरण्ये विजने न्यस्तं परस्वं दृश्यते यदा।
मनसाऽपि न हिंसन्ति ते नराः स्वर्गगामिनः॥३०२॥

वेश्यासौ मदनज्वाला रूपेन्धनसमेधिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥३०३॥
सद्भावो नास्ति वेश्यानां, स्थिरता नास्ति सम्पदाम् ।
विवेको नास्ति मूर्खाणां, विनाशो नास्ति कर्मणाम् ॥३०४॥
कष्टं जीवति गणिका, गणकोऽपि च, राजसेवको, वैद्यः ।
दिवसे दिवसे मरणं परस्य यच्चित्तरञ्जनं वृत्तिः ॥३०५॥
समुद्रवीचीव चलस्वभावाः, सन्ध्याभ्ररेखेव मुहूर्तरागाः ।
वेश्याः कृतार्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्त्यजन्ति ॥३०६॥
दूरस्थाः पर्वता रम्या, वेश्या च मुखमण्डने ।
युद्धस्य वार्ता रम्या, त्रीणि रम्याणि दूरतः ॥३०७॥
कुलपतनं जनगर्हां बन्धनापि जीवितव्य-सन्देहम् ।
अङ्गीकरोति कुलटा सततं परपुरुषसंसक्ता ॥३०८॥
एता हसन्ति च रुदन्ति च कार्यहेतो-
र्विश्वासयन्ति च परं, न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलवता सदैव
वेश्याः स्मशानघटिका इव वर्जनीयाः ॥३०९॥
कुर्वन्ति तावत्प्रथमं प्रियाणि यावन्न जानन्ति नरं प्रसक्तम् ।
ज्ञात्वा च मन्मथपाशबद्धं ग्रस्तामिशं मीनमिवोद्धरन्ति ॥३१०॥
उपभुक्तखदिरवीटकजनिताधररागभङ्गभयात् ।
पितरि मृतेऽपि हि वेश्या रोदिति हा तात तातेति ॥३११॥

मद्येन मनसश्चास्य संक्षोभः क्रियते महान् ।
महामरुतवेगेन तटस्थस्येव शाखिनः ॥३१२॥
मद्योपहतविज्ञाना वियुक्ताः सात्विकैर्गुणैः ।
श्रेयोभिर्विप्रयुज्यन्ते मदान्धा मदलालसाः ॥३१३॥
मद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संश्रितः ।
सोन्मादमदमूर्छाद्याः सापस्मारपतानकाः ॥३१४॥
उद्योगः कलहः कण्डूर्द्यूतं मद्यं परस्त्रियः ।
आहारो मैथुनं निद्रा सेवनात्तु विवर्धते ॥३१५॥
वैकल्यं धरणीपातमयथोचितजल्पनम् ।
सन्निपातस्य चिन्हानि मद्यं सर्वाणि दर्शयेत् ॥३१६॥
चित्ते भ्रान्तिर्जायते मद्यपाना-
द्भ्रान्ते चित्ते पापचर्यामुपैति ।
पापं कृत्वा दुर्गतिं यान्ति मूढा-
स्तस्मान्मद्यं नैव पेयं न पेयम् ॥३१७॥
एकतश्चतुरो वेदा, ब्रह्मचर्यं यथैकतः ।
एकतः सर्वपापानि , मद्यपानं तथैकतः ॥३१८॥
मद्यपस्य कुतः सत्यं , दया मांसाशिनः कुतः ।
कामिनश्च कुतो विद्या, निर्धनस्य कुतः क्रियाः ॥३१९॥
कवयः किं न पश्यन्ति, किं न कुर्वन्ति योषितः ।
मद्यपाः किं न जल्पन्ति, किं न भक्षन्ति वायसाः ॥३२०॥
ज्योतिषं जलदे मिथ्या, मिथ्या श्वासिनि वैद्यकम् ।

योगो बह्वशने मिथ्या, मिथ्या ज्ञानं च मद्यपे ॥३२१॥

सीदन्ति चाग्निहोत्राणि, गुरुपूजा प्रणश्यति ।
कुमार्यश्च प्रसूयन्ते प्राप्ते **कलियुगे** सदा ॥३२२॥
सीदन्ति सन्तो, विलसत्यसन्तः, पुत्रा म्रियन्ते, जनकाश्चिरायुः ।
परेषु मैत्री, स्वजनेषु वैरं, पश्यन्तु लोकाः कलिकौतुकानि ॥३२३॥
निर्वीर्या पृथिवी निरोषधिरसा, नीचा महत्वं गता
भूपाला निजकर्मधर्मरहिता, विप्राः कुमार्गे रताः ।
भार्या भर्तृविरोधिनी पररता, पुत्राः पितृद्वेषिणो
हा कष्टं खलु वर्तते कलियुगे धन्या नराः सज्जनाः ॥३२४॥
परान्नेन मुखं दग्धं, हस्तौ दग्धौ प्रतिग्रहात् ।
परस्त्रीभिर्मनो दग्धं, कुतः शापः कलौ युगे ॥३२५॥
सन्तः क्वापि न सन्ति, सन्ति यदि वा दुःखेन जीवन्ति ते
विद्वांसोऽपि न सन्ति, सन्ति यदि वा मात्सर्ययुक्ताश्च ते ।
राजानोऽपि न सन्ति, सन्ति यदि वा तृष्णाधनग्राहिणो
दातारोऽपि न सन्ति, सन्ति यदि वा सेवानुकूलाः कलौ ॥३२६॥
अकृत्यं मन्यते कृत्यमगम्यं मन्यते सुगम् ।
अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो नरः ॥३२७॥
कौपीनं, भस्मना लेपो, दर्भा, रुद्राक्षमालिका ।
मौनमेकान्तिका चेति मूर्खसंजीवनानि षट् ॥३२८॥
तावद्धीर्घं नित्यकर्म यावत्स्याद्द्रष्टृमेलनम् ।

तावत्संक्षिप्यते सर्वं यावद् द्रष्टा न विद्यते ॥३२९॥
यत्र भार्यागिरो वेदा, यत्र धर्मोऽर्थसाधनम् ।
यत्तस्य प्रतिभा मानं, **तस्मै श्रीकलये नमः** ॥३३०॥

अनाहूताः स्वयं यान्ति रसास्वादविलोलुपाः ।
निवारिता न गच्छन्ति मक्षिका इव **भिक्षुकाः** ॥३३१॥
उच्चैरध्ययनं, पुरातनकथाः, स्त्रीभिः सहालापनं
तासामर्भकलालनं, पतिनुतिस्तत्पाकमिथ्यास्तुतिः ।
आदेशस्य करावलम्बनविधिः, पाण्डित्यलेखक्रिया
होरागारुडमन्त्रतन्त्रकविधिर्भिक्षोर्गुणा द्वादश ॥३३२॥
प्रातः क्षालितलोचनाः, करतले चञ्चत्पवित्राङ्कुरा-
स्तत्तत्स्थाननिवेशितोर्ध्वतिलकाश्चैलान्तबद्धाक्षताः ।
को जातश्च मृतोऽथ वा, मृतातिथिः कस्यालये वर्तते
चेत्थं हर्षशतैर्युताः प्रतिदिन धावन्त्यहो भिक्षुकाः ॥३३३॥
भो भाद्रपक्ष सकलद्विजकल्पवृक्ष
क्वास्मान्विहाय गतवानसि देहि वाचम् ।
डिण्डीरपिण्डपरिपाण्डुरवर्णभाजां
लाभः कथं त्वयि गते घृतपायसानाम् ॥३३४॥
अगास्तितुल्याश्च घृताब्धिशोषणे, दम्भोलितुल्या वटकाद्रिभेदने ।
शाकावलीकाननवन्हिरूपास्त एव भट्टा, इतरे भटाश्च ॥३३५॥
विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना-

स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरे ॥३३६॥

अलंकरोति हि **जरा** राजामात्यभिषग्यतीन् ।
विडम्बयति पण्यस्त्रीमल्लगायकसेवकान् ॥३३७॥

बालत्वं च मृता माता, वृद्धत्वं च मृताः सुताः ।
यौवनं च हता भार्या, पातकं किमतः परम् ॥३३८॥

श्रुतिः शिथिलतां गता, स्मृतिरपि प्रनष्टाधुना
गतिर्विपथमागता, विगलिता द्विजानां ततिः ।
गवामपि च संहतिः समुचितक्रियातश्च्युता
कृता नु जरया तया कलियुगस्य साधर्म्यता ॥३३९॥

दन्तावलिर्विगलिता, गलितं शरीरं,
केशाश्च फेनधवला, न हि मे विषादः ।
एणीदृशो युवतयो पथि मां विलोक्य
तातेति भाषणपराः शतकुन्तघातः ॥३४०॥

पाणौ गृहीतापि, पुरस्कृतापि, स्नेहेन नित्यं परिवर्धितापि ।
परोपकाराय भवेदवश्य वृद्धस्य भार्या करदीपिकेव ॥३४१॥

वदनं दशनविहीनं, वाचो न परिस्फुटा, गता शक्तिः ।
अव्यक्तेन्द्रियशक्तिः, पुनरपि बाल्यं कृतं जरया ॥३४२॥

गात्रं संकुचितं, गतिर्विगलिता, भ्रष्टा च दन्तावलि-

र्दृष्टिर्नश्यति, वर्धते बधिरता, वक्त्रं च लालायते ।
वाक्यं नाद्रियते च बान्धवजनो, भार्या न शुश्रूषते ।
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ॥३४३॥

अधः पश्यसि किं बाले, तव किं पतितं भुवि ।
रे रे मूढ न जानासि गतं तारुण्यमौक्तिकम् ॥३४४॥

संतोषस्त्रिषु कर्तव्यः, स्वदारे भोजने धने ।
त्रिषु चैव न कर्तव्यो, दाने तपसि पाठने ॥३४५॥

सर्पा पिबन्ति पवनं न च दुर्बलास्ते शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा गमयन्ति कालं सन्तोष एव पुरुषस्य परं निधानम् ॥
संतोषामृततृप्तानां यत्सुखं शान्तिरेव च ।
न च तद्धनलुब्धानामितश्चेतश्च धावताम् ॥३४६॥

गन्धाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां
तां दृष्ट्वाशु गतः स चन्दनवनं, पश्चात्सरोजं गतः ।
बद्धस्तत्र निशाकरेण सहसा रोदित्यसौ मंदधीः
सन्तोषेण विना पराभवपदं प्राप्नोति सर्वो जनः ॥३४७॥

सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥३४८॥

कार्यार्थी भजते लोके यावत्कार्यं न सिध्यति ।
उत्तीर्णे च परे पारे नौकायाः किं प्रयोजनम् ॥३४९॥

षडेते ह्यवमन्यन्ते नित्यं पूर्वोपकारिणम् ।

आचार्यं शिक्षिताः शिष्याः, कृतदाराश्च मातरम् ॥
नारीं विगतकामास्तु, कृतार्थाश्च प्रयोजकम् ।
नावं निस्तीर्णक्षीरोदा, आतुराश्च चिकित्सकम् ॥३९०॥
गृहीत्वा दक्षिणां विप्रास्त्यजन्ति यजमानकम् ।
प्राप्तविद्यागुरुं शिष्या, दग्धारण्यं मृगास्तथा ॥३९१॥
पीयूषेण सुरा, श्रिया मुररिपुर्मर्यादया मेदिनी
शक्रः कल्पतरुहा शशाङ्ककलया श्रीशंकरस्तोषितः ।
मैनाकादिनगा निजोदरगृहे यत्नेन संरक्षिताः
मच्चूलीकरणे घटोद्भवमुनिः केनापि नो वारितः ॥३९२॥
स्वार्थीना दयिता सुतावधि, सुतोऽसौ षोडशाब्दावधिं
स्यात्कन्या करपीडनावधि, सुतस्त्री तद्दशत्वावधि ।
जामाता बहुलार्पितावधि सखा साधुप्रलापावधि
शिष्यो गुह्यनिरूपणावधि परे चैते धनित्वावधि ॥३९३॥
कृतार्थः स्वामिनं द्वेष्टि, कृतदारस्तु मातरम् ।
जातापत्या पतिं द्वेष्टि, गतरोगश्चिकित्सकम् ॥३९४॥
उपाध्यायश्च, वैद्यश्च, ऋतुकाले वरांगना ।
दूतिका, सूतिका चैव कार्यान्ते तृणवत्समाः ॥३९५॥

का पाण्डुपत्नी, गृहभूषणं किं, को रामशत्रुः, किमगस्त्यजन्म ।
कः सूर्यपुत्रो, विपरीतपृच्छा, कुन्ती, सुतो, रावणकुम्भकर्णः॥३९६॥
भागीरथी कथं भूता, कामिनी प्राह किं प्रियम् ।

एकमेवोत्तरं देहि शास्त्रलौकिकभाषया ॥३९७॥
कस्तूरी जायते कस्मात्को हन्ति करिणां शतम् ।
किं कुर्यात्कातरो युद्धे, मृगात्सिंहः, पलायनम् ॥३९८॥
कं संजघान कृष्णः, का शीतलवाहिनी गङ्गा ।
के दारपोषणरताः, **कं बलवन्तं न बाधते शीतम्** ॥३९९॥
करोति शोभामलके स्त्रियाः को, दृश्या न कान्ता विधिना च कोक्ता ।
अङ्गे तु कस्मिन्दहनः पुरारेः, सिन्दूरबिन्दुर्विधवा, ललाटे ॥४००॥
युधिष्ठिरः कस्य पुत्रो, गङ्गा वहति कीदृशी ।
हंसस्य शोभा का वास्ते, **धर्मस्य, त्वरिता, गतिः** ॥४०१॥
एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ॥४०२॥
मूकारब्धं कमपि बधिराः श्लोकमाकर्णयन्ति ।
श्रद्धालुस्तं विलिखति कुणिः, श्लाघया वीक्षतेऽन्धः ।
अभ्यारोहत्यहह सहसा पङ्गुरप्यद्रिशृङ्गं
सान्द्रालस्याः शिशुभरणतो मन्दमायान्ति वन्ध्याः ॥४०३॥
न केनापि श्रुतं दृष्टं वारिणा वारि शुष्यति ।
अहो गोदावरीवारा भवसिन्धुर्विशुष्यति ॥४०४॥
अस्थि नास्ति, शिरो नास्ति, बाहुरस्ति निरङ्गुलिः ।
नास्ति पादद्वयं, गाढमङ्गमालिङ्गति च स्वयम् ॥
दन्तैर्हीनः शिलाभक्षी, निर्जीवो बहुभाषकः
गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति ॥४०५॥

आदौ गृहीतपाणिः पश्चादारूढजघनकटिभागा ।
नखमुखलालनसुखदा, सा किं रामास्ति? नैव, भोः पामा ॥३६६॥

या पाणिग्रहलालिता सुसरला तन्वी सुवंशोद्भवा
गौरी स्पर्शसुखावहा गुणवती नित्यं मनोहारिणी ।
सा केनापि हृता, तया विरहितो गन्तुं न शक्तोऽस्म्यहं
रे भिक्षो तव कामिनी? न हि, न हि, प्राणप्रिया यष्टिका ॥३६७॥

पुराकृतकरग्रहा वसनपात्ररक्षाकरी
स्थिता शयनसन्निधौ गुणवती निगूढानना ।
मता जठरपूर्तये भुजशिरःसमारोपिता
मनो हरति धोंगटी युवतिवत्प्रवासे नृणाम् ॥३६८॥

वृक्षाग्रवासी, न च पक्षिराजस्त्रिनेत्रधारी, न च शूलपाणिः ।
त्वग्वस्त्रधारी, न च सिद्धयोगी; जलं च बिभ्रन्न घटो, न मेघः ३६९

एकाक्षुर्न काकोऽयं, बिलमिच्छन्न पन्नगः ।
क्षीयते वर्धते चैव, न समुद्रो, न चन्द्रमाः ॥३७०॥

सर्वस्वापहरो न तस्करगणो, रक्षो न रक्ताशनः
सर्पो नैव बिलेशयोऽखिलनिशाचारी न भूतोऽपि च ।
अन्तर्धानपटुर्न सिद्धपुरुषो, नाप्याशुगो मारुत-
स्तीक्ष्णास्यो न तु सायकस्तमिह ये जानन्ति ते पण्डिताः ॥३७१॥

आषाढी, कार्तिकी, माघी, वचा, शुण्ठी, हरीतकी
गयायां पिण्डदानेन, पुण्या, श्लेष्महराऽनृणी ॥३७२॥

के शवं पतितं दृष्ट्वा पाण्डवा हर्षनिर्भराः ।

रुरुदुः कौरवाः सर्वे, हा हा केशव केशव ॥३७३॥

शंकरं पतितं दृष्ट्वा पार्वती हर्षनिर्भरा
रुरुदुः पन्नगाः सर्वे हा हा शंकर शंकर ॥३७४॥

सुवर्णालंकृता कन्या हेमालंकारवर्जिता ।
सा कन्या विधवा जाता गृहे रोदिति तत्पतिः ॥३७५॥

द्वन्द्वोऽहं, द्विगुरपि चाहं, मद्देहे नित्यमव्ययीभावः ।
तत्पुरुष कर्म धारय, येनाहं स्यां बहुव्रीहिः ॥३७६॥

अहं च त्वं च राजेन्द्र लोकनाथावुभावपि ।
बहुव्रीहिरहं राजन्, षष्ठीतत्पुरुषो भवान् ॥३७७॥

राक्षसेभ्यः सुतां हृत्वा जनकस्य, पुरीं ययौ ।
अत्र कर्तृपदं गुप्तं, मर्यादा दशवार्षिकी ॥३७८॥

आगतः पाण्डवाः सर्वेऽदुर्यो धनसमीहया ।
तस्मै गां च सुवर्णं च रत्नानि विविधानि च ॥३७९॥

विराट नगरे राजन् कीचकादुपकीचकम् ।
अत्र क्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥३८०॥

कीलालैः कुंकुमानां सकलमपि जगज्जालमेतन्निषिक्तं
मुक्ताश्चोन्मत्तभृंगा विघटितकमलक्रोडकारागृहेभ्यः ।
उत्सृष्टं गोसहस्रं, बहलकलकलः श्रूयते च द्विजानां
भाग्यैर्वृन्दारकाणां हरिहृदयदयिता सूयते पुत्ररत्नम् ॥३८१॥

अभूत्प्राची पिङ्गा रसपतिरिव प्राप्य कनकं

गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
क्षणं क्षीणास्तारा नृपतय इवानुद्यमपरा
न दीपा राजन्ते द्रविणरहितानामिव गुणाः ॥३८२॥

विरलविरलीभूतास्तारा: कलौ सुजना इवा-
प्यपसरति च ध्वान्तं चित्तात्सतामिव दुर्जनः ।
मन इव मुनेः सर्वत्रापि प्रसन्नमभून्नभो
विगलति निशा क्षिप्रं लक्ष्मीरनुद्यमिनामिव ॥३८३॥

दिक्चक्रं मृगतृष्णया कवलितं, व्योमापि भास्वत्कर-
च्छायाभिः क्षुरितं, तुषानलकणप्रायाश्च भूरेणवः ।
पान्थाः पल्लवसंकुलद्रुमलताकुंजे मुहुः शेरते
मज्जत्कुंजरतालतोलितजलाः क्षुभ्यन्ति तोयाशयाः ॥३८४॥

क्षपाः क्षामीकृत्य प्रसभमपहृत्यांबु सरितां
प्रताप्योर्वीं सर्वां, तरुगहनमुच्छोष्य सकलम् ।
क्व संप्रत्युष्मांशुर्गत इति तदालोकनपरा-
स्तडिद्दीपा लोकं दिशि दिशि चरन्तीव जलदाः ॥३८५॥

तवैव प्राविण्यं **जलद**, जगदानन्दकारणं
यदम्भःपालीराहरसि खलसत्त्वाज्जलनिधेः ।
निसर्गात्क्षारास्ता नयसि च कथंचिन्मधुरता-
मथासारैस्तासां युगपदुपकर्तासि जगतः ॥३८६॥

अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ये,
भ्रातश्चातक, किं वृथा विरुदितैः, खिन्नोऽसि, विश्राम्यताम् ।
मेघः शारद एव काशधवलः पानीयरिक्तोदरो
गर्जत्येव हि केवलं भृशतरं, नो बिन्दुमप्युज्झति ॥३८७॥

चातकः स्वानुमानेन जलं प्रार्थयतेऽम्बुदात् ।
स स्वोदारतया सर्वां प्लावयत्यम्बुना महीम् ॥३८८॥

पाथोनिधिमधि पाथो वितरसि, पाथोद, किं तेन ।
दिनकरकरातितप्तं चातकपोतं न तोषयसि ॥३८९॥

घातोल्लासितकल्लोल धिक् ते **सागर** गर्जनम् ।
यस्य तीरे तृषाक्रान्तः पान्थः पृच्छति वापिकाम् ॥३९०॥

किं खलु रत्नैरलैः, किं खलु रत्नाधिपेन वपुषा ते ।
सलिलमपि यन्न तावकमर्णव, वदनं प्रयाति तृषितानाम् ॥३९१॥

स्वस्त्यस्तु विद्रुमवनाय, नमो मणिभ्यः,
कल्याणिनी भवतु मौक्तिकशुक्तिमाला ।
प्राप्तं मया सकलमेव फलं, पयोधे,
यद्दारुणैर्जलचरैर्न विदारितोऽस्मि ॥३९२॥

आदाय वारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे, विनिवेशितं च ॥३९३॥

तृषां धरायाः शमयत्यशेषां
यः सोऽम्बुदो गर्जति, गर्जतूच्चैः ।
यस्त्वेष कस्यापि न हन्ति तृष्णां
स किं वृथा गर्जति निस्त्रपोऽब्धिः ॥३९४॥

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
धन्या **महीरुहो**, येभ्यो निराशां यान्ति नार्थिनः ॥३९५॥
धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च ।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥३९६॥
पत्राणि जीर्णानि, फलं विनष्टं, छाया गता, पक्षिकुलैः प्रयातम् ।
वसंत जानीहि तवाशयोऽसौ समुन्नतिं नैव जहाति वृक्षः ॥३९७॥
ये पूर्वं परिपालिताः फलभरच्छायादिभिः प्राणिनो
विश्रामद्रुम, कथ्यतां तव विपत्काले क्व ते सांप्रतम् ।
एताः सगतिमात्रकल्पितपुरस्कारास्तु धन्यास्त्वचो,
यासां छेदनमन्तरेण पतिता नायं कुठारस्त्वयि ॥३९८॥
मधुगमिव वदन्ति स्वागतं भृंगनादै-
र्नतिमिव फलनम्रैः कुर्वतोऽमी शिरोभिः ।
ननु ददत इवार्घं पुष्पवृष्टिं किरन्तः
कथमतिथिजनानां शिक्षिता शाखिनोऽपि ॥३९९॥
यद्यपि **चन्दनविटपी** विधिना फलकुसुमवर्जितो विहितः ।

निजवपुषैव परेषां तथापि संतापमपनयति ॥४००॥
पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्तुम् ।
यत्पिष्टतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥४०१॥
यद्यपि खदिरारण्ये गुप्तो वस्ते हि **चम्पको** वृक्षः ।
तदपि च परिमलमतुलं दिशि दिशि कथयेत्समीरणस्तस्य ॥४०२॥
आकर्ण्याम्रफलस्तुतिं जलमभूत्तन्नारिकेलान्तरं
प्रायः कंटकितं तथैव पनसं, जातं द्विधा वारुकम् ।
आस्तेऽधोमुखमेव कादलमलं, द्राक्षाफलं क्षुद्रतां
श्यामत्वं बत जाम्बवं गतमहो मात्सर्यदोषादिह ॥४०३॥
येऽभिज्ञाः कुसुमाद्रमादनुदिनं त्वामाश्रिताः षट्पदा-
स्ते भाम्यन्ति फलाद्बहिरहो दृष्ट्वा न संभाषसे ।
ये कीटास्तव दक्पथं न च गतास्ते त्वत्फलाभ्यन्तरे
धिक्त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान् ॥४०४॥
गर्वं मा कुरु शर्करे तव गुणाज्ञानन्ति राज्ञां गृहे
ये दीना धनवर्जिताश्च कृपणाः स्वप्नेऽपि पश्यन्ति नो ।
आम्रोऽहं मधुकूपकैर्मम फलैस्तृप्ता हि सर्वे जना
हे रण्डे तव किं गुणा, मम फलैस्तुल्यं न किंचित्फलम् ॥४०५॥
गात्रं कण्टकसंकटं, प्रविरलच्छाया न चायासहा
निर्गन्धः कुसुमोत्करस्तव, फलं न क्षुद्विनाशक्षमम् ।
बञ्चुलद्रुममेति न जनस्तत्तावदास्तामहो
अन्येषामपि शाखिनां फलवतां गुप्त्यै वृतिर्जायते ॥४०६॥

पत्राणि कण्टकशतैः परिवेष्टितानि
वार्तापि नास्ति मधुनो, रजसान्धकारः ।
आमोदमात्ररसिकेन मधुव्रतेन
नालोकितानि तव **केतकि** दूषणानि ॥४०७॥

व्यालाश्रयापि विकलापि सकंटकापि
वक्रापि पंकिलभवापि दुरासदापि ।
गन्धेन बन्धुरसि केतकि सर्वजन्तो-
रेको गुणः खलु निहन्ति समस्तदोषान् ॥४०८॥

अपसर मधुकर दूरं परिमलबहुलेऽपि केतकीकुसुमे ।
इह न हि मधुलवलाभो, भवति परं धूलिधूसरं वदनम् ॥४०९॥

इक्षुदण्डास्तिलाः क्षुद्राः कान्ता हेम च मेदिनी ।
चन्दनं दधि ताम्बूलं **मर्दनं गुणवर्धनम्** ॥४१०॥

ग्रंथिलतया किमिक्षोः, किमपत्रंशेन भवति गतिस्य ।
किमनार्जवेन शशिनः, किं दारिद्र्येण दयितस्य ॥४११॥

इक्षोरग्रात्क्रमशः पर्वणि पर्वणि यथा रसविशेषः ।
तद्वत्सज्जनमैत्री विपरीतानां तु विपरीता ॥४१२॥

कान्तोऽसि नित्यमधुरोऽसि रसाकुलोऽसि
किं चासि पंचशरकार्मुकमद्वितीयम् ।
इक्षो तवास्ति सकलं, परमेकमूनं
यत्सेवितो भजसि नीरसतां क्रमेण ॥४१३॥

भारतं चेक्षुदण्डं च कलानाथं च वर्णय ।

कालिदासः कविर्ब्रूते प्रतिपर्वरसावहम् ॥४१४॥

यद्यपि च दैवयोगात्सिंहः पतितोऽतिदुस्तरे कूपे ।
तदपि च वाञ्छति सततं करिकुम्भविदारणं मनसि ॥४१५॥

स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति, न तु तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वांछति जनः सत्त्वानुरूपं फलम् ॥

एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः ।
स्वप्नेऽप्येवंविधां चिन्तां मृगेन्द्रस्य न जायते ॥४१७॥

एकाकिनि वनवासिन्यराजलक्ष्मण्यनीतिशास्त्रज्ञे ।
सत्त्वोच्छ्रिते मृगपतौ राजति गिरः परिणमन्ति ॥४१८॥

नाभिषेको न संस्कारः सिंहस्य क्रियतेऽधुना ।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥४१९॥

एणः क्रीडति, मूषिकश्च खनति, द्वीपी च गर्वायते
क्रोष्टा क्रन्दति, वल्गते च शशको, वेगाद्वुरुर्धावति ।
निःशंकं करिपोतकस्तरुलतामुन्मोटते लीलया
हं हो सिंह, विना त्वयाऽद्य विपिने कीदृग् दशा वर्तते ॥४२०॥

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं

नखानां पाण्डित्यं प्रकटयतु कस्मिन्मृगपतिः ॥४२१॥
क्षुत्क्षामोऽपि, जराकृशोऽपि, शिथिलप्रायोऽपि, कष्टां दशा-
मापन्नोऽपि, विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥४२२॥
उत्तुङ्गमत्तमातङ्गमस्तकन्यस्तलोचनः ।
आसन्नेऽपि च सारङ्गे न वाञ्छां कुरुते हरिः ॥४२३॥
यदि मत्तोऽसि **मतङ्गज** किममीभिरसारसरलतरुदलनैः ।
हरिमनुसर खरनखरं, व्यपनेष्यति ते करटकण्डूतिम् ॥४२४॥
कर्णे चामरचारुचञ्चुकलिका, कण्ठे मणीनां गणः
सिन्दूरप्रकरः शिरःपरिसरे, पार्श्वान्तिके किङ्किणी ।
लब्धश्चेन्नृपवाहनेन करिणा बद्धेन भूषाविधि-
स्तत्किं भूधरधूलिधूसरतनुर्मान्यो न वन्यो गजः ॥४२५॥
कौपे पयसि लघीयसि तापेन करः प्रसारितः करिणा ।
सोऽपि न पयसा लिप्तो, लाघवमात्मा परं नीतः ॥४२६॥
ऊर्णा नैष बिभर्ति, नैष विषयो दोहस्य वाहस्य वा
तृप्तिर्नास्य महोदरस्य बहुभिर्वासैः पलालैरपि ।
हा कष्टं कथमस्य पृष्ठशिखरे गोणी समारोप्यते
का गृह्णाति कपर्दकैरलमहो ग्राम्यैर्गजो हास्यते ॥४२७॥
पीतं यत्र हिमं पयः, कवलिता यस्मिन्मृणालांकुरा-
स्तापार्तेन निमज्य यत्र सरसो मध्ये विमुक्तः श्रमः ।

विक्तस्यैव जलानि पंकिलयतः, पाथोजिनीं मथ्नतो
मूलान्युत्खनतः करीन्द्र भवतो लज्जापि नो जायते ॥४२८॥
दूर्वाङ्कुरतृणाहारा धन्यास्तात वने **मृगाः** ।
विभवोन्मत्तचित्तानां न पश्यन्ति मुखानि यत् ॥४२९॥
यद्वक्त्रं मुहुरीक्षसे न धनिनां, ब्रूषे न चाटून्मृषा
नैषां गर्वगिरः शृणोषि, न च तान्प्रत्याशया धावसि ।
काले बालतृणानि खादसि, परं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः ॥४३०॥
वसन्त्यरण्येषु चरन्ति दूर्वां, पिबन्ति तोयान्यपरिग्रहाणि ।
तथापि वध्या हरिणा नराणां, **को लोकमाराधयितुं समर्थः** ॥

रे राजहंस, किमिति त्वमिहाप्तोऽसि
योऽसौ बकः स इह हंस इति प्रतीतिः ।
तद्गम्यतामनुपदेन पुनः स्वभूमौ
यावद्वदन्ति न बकं खलु मूर्खलोकाः ॥४३२॥
अपसरणमेव शरणं मौनं वा तत्र राजहंसस्य ।
कटु रटति निकटवर्ती वाचालष्टिट्टिभो यत्र ॥४३३॥
हंसोऽध्वगश्रममपोहयितुं दिनान्ते
कारण्डकाकबककोककुलं प्रविष्टः ।
मूकोऽयमित्युपहसन्ति लुनन्ति पक्षा-
न्नीचाश्रयो हि महतामपमानहेतुः ॥४३४॥

यदि नाम दैवगत्या जगदसरोजं सदैव संजातम् ।
अवकरनिकरं विकिरति तत्किं कुक्कुवाकुरिव हंसः ? ॥४३५॥
अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते न मरालस्य मानसं मानसं विना ॥४३६॥
नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वेऽस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥४३७॥
हे पक्षिन्नागतस्त्वं कुत इह, सरसस्तत्किंयद् भो विशालं
किं मद्वान्नोऽपि बाढं ? तदपि शठ महापाप मा ब्रूहि मिथ्या ।
इत्थं कूपोदरस्थः शपति तटगतं दर्दुरो राजहंसं
नीचः प्रायः सगर्वो भवति हि, विषया यैः परेषां न दृष्टाः ॥४३८॥
ये वर्धिता कनकपङ्कजरेणुमध्ये
मन्दाकिनीविमलनीरतरङ्गभङ्गैः ।
ते सांप्रतं विधिवशात्खलु राजहंसाः
शैवालजालजटिलं जलमाश्रयन्ति ॥४३९॥
पश्य लक्ष्मण पम्पायां **बकः** परमधार्मिकः ।
शनैर्धुनक्ति पादाग्रं प्राणिनां वधशङ्कया ॥४४०॥
सहवासी विजानाति सहवासिविचेष्टितम् ।
बकं किं वर्ण्यसे, राम, येनाहं निष्कुलीकृतः ॥४४१॥
एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ॥४४२॥
हंसः प्रयाति शनकैर्यदि, यातु तस्य

नैसर्गिकी गतिरियं हि न तत्र चित्रम् ।
गत्या तया जिगमिषुर्बक एव मूढ-
श्चेतो दुनोति सकलस्य जनस्य नूनम् ॥४४३॥
चातक, धूमसमूहं दृष्ट्वा मा धाव वारिधरबुद्ध्या ।
इह हि भविष्यति भवतो नयनयुगादेव वारिणां पूरः ॥४४४॥
कूपे पानमधोमुखं भवति मे, नद्यो वराक्यः स्त्रियः
सारंगैर्बकटिट्टिभैः सह सरस्येवं समालोकयन् ।
नादत्ते तृषितोऽपि हीनसलिलं क्रूरैर्वृतं जंतुभि-
र्मानादुन्नतकंधरः सुरपतिं तच्चातको याचते ॥४४५॥
एक एव खगो मानी चिरं जीवतु चातकः ।
म्रियते वा पिपासायां, याचते वा पुरन्दरम् ॥४४६॥
पलाशकुसुमभ्रान्त्या **शुक**तुण्डे पतत्यलिः ।
सोऽपि जम्बुफलभ्रान्त्या तमलिं धर्तुमिच्छति ॥४४७॥
वासः काञ्चनपिञ्जरे, नृपकराम्भोजैस्तनूमार्जनं
भक्ष्यं स्वादुरसालदाडिमफलं, पेयं सुधाभं पयः ।
पाठः संसदि रामनाम सततं धीरस्य कौरस्य मे
हा हा हन्त तथापि जन्म, विटपिक्रोडं मनो धावति ॥४४८॥
अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।
शुक, पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥४४९॥
रे रे **कोकिल** मा भज मौनं किंचिदुच्चय पञ्चमरागम् ।
नो चेत्त्वामिह को जानीते काककदम्बकपिहिते चूते ॥४५०॥

अस्यां सखे बधिरलोकनिवासभूमौ
किं कूजितेन, किल कोकिल, कोमलेन ।
एते हि दैवहतकास्तदभिन्नवर्ण
त्वां काकमेव कलयन्ति कलानभिज्ञाः ॥४५१॥

भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥४५२॥

तावन्मौनेन नीयन्ते कोकिलैश्चैव वासराः ।
यावत्सर्वजनानन्ददायिनी वाक् प्रवर्तते ॥४५३॥

काकः कृष्णः, पिकः कृष्णस्त्वभेदः पिककाकयोः ।
वसन्ते समुपायाते काकः काकः, पिकः पिकः ॥४५४॥

सुभाषितस्याध्ययनानुरक्तं शुकं बराकाः प्रहसन्ति **काकाः**
तमेव संसत्सु गिरं किरन्तं दृष्ट्वा भवन्ति त्रपया नतास्याः ॥४५५॥

आमरणादपि विरुतं कुर्वाणाः स्पर्धया सह मयूरैः ।
किं जानन्ति वराकाः काकाः केकारवं कर्तुम्? ॥४५६॥

तुल्यवर्णच्छदः कृष्णः कोकिलैः सह संगतः ।
केन विज्ञायते काकः स्वयं यदि न भाषते ॥४५७॥

विधिरेव विशेषगर्हणीयः, करट त्वं रट, कस्तवापराधः ।
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥४५८॥

काकस्य गात्रं यदि काञ्चनस्य, माणिक्यरत्नं यदि चञ्चुदेशे ।
एकैकपक्षे ग्रथितं मणीनां, तथापि काको न तु राजहंसः॥४५९॥

एकवर्णमिदं पूर्वं विश्वमासीद्युधिष्ठिर ।
कर्मक्रियाविभेदेन **चातुर्वर्ण्यं** प्रतिष्ठितम् ॥४६०॥

जन्मना जायते शूद्रः, संस्काराद्विज उच्यते ।
वेदाभ्यासी भवेद्विप्रो, **ब्रह्म जानाति ब्राह्मणः** ॥४६१॥

शाके पत्रे फले मूले वनवासे सदा रतः ।
निरतो अहरहः श्राद्धे, स विप्रो मुनिरुच्यते ॥४६२॥

वेदान्तं पठते नित्यं, सर्वसंगं परित्यजेत् ।
सांख्ययोगविचारस्थः स विप्रो द्विज उच्यते ॥४६३॥

शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं **ब्रह्मकर्म स्वभावजम्** ॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च **क्षात्रं कर्म स्वभावजम्** ॥४६४॥

कृषिकर्मरतो यश्च गवां च परिपालकः ।
वाणिज्यव्यवसायश्च स विप्रो वैश्य उच्यते ॥४६५॥

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥४६६॥

क्रियाहीनश्च मूर्खश्च सर्वधर्मविवर्जितः ।
निर्दयः सर्वभूतेषु विप्रश्चाण्डाल उच्यते ॥४६७॥

जायांसमपि, शीलेन विहीनं नैव पूजयेत् ।
अपि शूद्रं च धर्मज्ञं सद्वृत्तमभिपूजयेत् ॥४६८॥

शूद्रोऽपि शीलसंपन्नो गुणवान् ब्राह्मणो भवेत् ।

ब्राह्मणोऽपि क्रियाहीनः शूद्रात्प्रत्यवरो भवेत् ॥४६९॥
चतुर्वेदोऽपि दुर्वृत्तः स शूद्रादतिरिच्यते ।
योऽग्निहोत्रपरो दान्तः स ब्राह्मण इति स्मृतः ॥४७०॥
न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्तेष्वपि हि जातानां वृत्तमेव विशिष्यते ॥४७१॥
न जातिर्न कुलं, तात, न स्वाध्यायो, न च श्रुतम् ।
कारणानि द्विजत्वस्य, **वृत्तमेव तु कारणम्** ॥४७२॥
कर्मभिः शुचिभिर्देवि, शुद्धात्मा विजितेन्द्रियः ।
शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्मानुशासनम् ॥४७३॥

बाह्ये मुहूर्ते बुध्येत, धर्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥४७४॥
पुनर्वित्तं, पुनर्मित्रं, पुनर्भार्या, पुनर्मही ।
एतत्सर्वं पुनर्लभ्यं, **न शरीरं पुनः पुनः** ॥४७५॥
दीपनं वृष्यमायुष्यं स्नानमोजोबलप्रदम् ।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाकनुत् ॥४७६॥
अभ्यङ्गं कारयेन्नित्यं सर्वेष्वङ्गेषु पुष्टिदम् ।
शिरःश्रवणपादेषु तं विशेषेण शीलयेत् ॥४७७॥
व्यायामक्षुण्णवपुषं, पद्भ्यां संमर्दितं तथा ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥४७८॥
लाघवं कर्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता ।

दोषक्षयोऽग्निवृद्धिश्च **व्यायामा**दुपजायते ॥४७९॥
श्रमः क्लमः क्षयस्तृष्णा रक्तपित्तं प्रतामकः ।
अतिव्यायामतः कासो ज्वरश्छर्दिश्च जायते ॥४८०॥
व्यायामहास्यभाषणाध्वग्रामधर्मप्रजागरान् ।
नोचितानपि सेवेत बुद्धिमानतिमात्रया ॥४८१॥
नित्यं हिताहारविहारसेवी समीक्ष्यकारी **विषयेष्वसक्तः** ।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः ॥४८२॥
मेदस्यतीव संवृद्धे सहसैवानिलादयः ।
विकारान्दारुणान्कृत्वा नाशयन्त्याशु जीवितम् ॥४८३॥
यच्छक्यं ग्रसितुं ग्रस्यं, ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥४८४॥
जीर्णे हितं मितं चाद्यान्न वेगान्धारयेद्बुधात् ।
न वेगितोऽन्यकार्यः स्यान्नाजित्वा साध्यमामयम् ॥४८५॥
अनभ्यासे विषं शास्त्रमजीर्णे भोजनं विषम् ।
विषं सभा दरिद्रस्य, वृद्धस्य तरुणी विषम् ॥४८६॥
न वेगितोऽन्यकार्यःस्यान्न वेगानीरयेद्बुधात् ।
कामशोकभयक्रोधान् मनोवेगान्विधारयेत् ॥४८७॥
साहसानामशस्तानां मनोवाक्कायकर्मणाम् ।
लोभशोकभयक्रोधमानवेगान्विधारयेत् ॥४८८॥
दुग्धं स्वादुरसं स्निग्धमोजस्यं धातुवर्धनम् ।
वातपित्तहरं वृष्यं श्लेष्मलं गुरुशीतलम् ॥४८९॥

सद्यः प्रज्ञाहरा तुण्डी, सद्यःप्रज्ञाकरी वचा ।
सद्यःशक्तिहरा नारी, सद्यःशुक्रकरं पयः ॥४९०॥
वृद्धार्को यज्ञधूम्रश्च बालस्त्री निर्झरोदकम् ।
आयुष्यवर्धकं नित्यं रात्रौ क्षीरान्नभोजनम् ॥४९१॥
बालार्कः प्रेतधूम्रश्च, वृद्धा स्त्री, निर्झरोदकम् ।
आयुष्यनाशकं नित्यं रात्रौ दध्यन्नभोजनम् ॥४९२॥
ज्वरादौ लङ्घनं प्रोक्तं, ज्वरमध्ये च पाचनम् ।
ज्वरान्ते भेषजं दद्यात्सर्वज्वरविनाशनम् ॥४९३॥
शयनं पित्तनाशाय, वातनाशाय मर्दनम् ।
वमनं कफनाशाय, ज्वरनाशाय **लङ्घनम्** ॥४९४॥
आमाशयस्थो हत्वाऽग्निं, सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥४९५॥
अतीव बलहीनं हि लङ्घनं नैव कारयेत् ।
ये गुणा लङ्घने प्रोक्तास्ते गुणा **लघुभोजने** ॥४९६॥
ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम् ।
यद्याधत्ते पुमान्गर्भः कुक्षिस्थः स विपद्यते ॥४९७॥
जातो वा न चिरंजीवेज्जीवेद्वा दुर्बलेन्द्रियः ।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत् ॥४९८॥
जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया गदः ।
वन्हिशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥४९९॥
जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत् ।

महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ॥५००॥
गण्डूषमपि कुर्वीत शीतेन पयसा मुहुः ।
कफतृष्णामलहरं मुखान्तःशुद्धिकारकम् ॥५०१॥
कासे श्वासे तथा शोषे मन्दाग्नौ विषमज्वरे ।
प्रमेहे मूत्रकृच्छ्रे च सेवयेन्मधुपिप्पलीम् ॥५०२॥
अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
सकलरसायनमहितो गन्धेनोग्रेण **लशुन** इव ॥५०३॥
हरिं हरीतकीं चैव गायत्रीं च दिने दिने ।
मोक्षारोग्यतपःकामश्चिन्तयेत्भक्षयेज्जपेत् ॥५०४॥

विष्णोश्चागमनं निशम्य सहसा, कृत्वा फणीन्द्रं गुणं
कौपीनं परिधाय चर्म करिणः, शम्भुः पुरो धावति ।
दृष्ट्वा विष्णुरथं सकम्पहृदयः सर्पोऽपतद्भूतले
कृत्तिर्विस्खलिता, ह्रिया नतमुखो नग्नो हरः पातु वः ॥५०५
अत्तुं वाञ्छति वाहनं गणपतेराखुं क्षुधार्तः फणी
तं च क्रौञ्चपतेः शिखी, च गिरिजासिंहोऽपि नागाननम् ।
गौरी जन्हुसुतामसूयति, कलानाथं कपालानलो
निर्विण्णः स पपौ कुटुम्बकलहादीशोऽपि हालाहलम् ॥५०६॥
हे हेरम्ब किमम्ब रोदिषि, कथं कर्णौ लुठत्यग्निभूः
किं ते स्कन्द विचेष्टितं? मम पुरा संख्या कृता चक्षुषाम् ।
तत्ते न द्युचितं गजास्य चरितं, नासा प्रमीता च मे

तावेवं सहसा विलोक्य हसितव्यग्रा शिवा पातु वः ॥९०७॥

रामाद्याचय मेदिनीं, धनपतेर्बीजं, बलाल्लाङ्गलं
प्रेतेशान्महिषं, तवास्ति वृषभः, फालं त्रिशूलादपि ।
शक्ताहं तव चान्नदानकरणे, स्कन्दोऽस्ति गोरक्षणे
खिन्नाहं तव याचनात्, कुरु कृषिं, भिक्षाटनं मा कृथाः ॥९०८॥

श्वशुरगृहनिवासः स्वर्गतुल्यो नराणां
यदि भवति विवेकी पञ्च वा षड् दिनानि ।
दधिमधुघृतलोभान्मासमेकं वसेच्चे-
द्भवति विगतलज्जो मानवो मानहीनः ॥९०९॥

राज्ञश्चामात्यजा दोषाः, पत्नीदोषास्तु भर्तरि ।
तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितम् ॥९१०॥

कार्पासं कटिनिर्मुक्तं, कौशेयं भोजनाधि ।
तृणवस्त्रं सदा शुद्धं, ऊर्णा वातेन शुध्यति ॥९११॥

एकाकिना तपो, द्वाभ्यां पठनं,गायनं त्रिभिः ।
चतुर्भिर्गमनं, क्षेत्रं पञ्चभिर्बहुभी रणः ॥९१२॥

एकस्तपो द्विरध्यायी त्रिधा गानं चतुष्पथः ।
पञ्चसप्तकृषिश्चैव संग्रामं बहुभिर्जनैः ॥९१३॥

एकः स्वादु न भुञ्जीत, नैकः सुप्तेषु जागृयात् ।
एको न गच्छेदध्वानं, नैकश्चार्थान् प्रचिन्तयेत् ॥९१४॥

पञ्चभिः सह गन्तव्यं, स्थातव्यं पञ्चभिः सह ।
पञ्चभिः सह वक्तव्यं, न दुःखं पञ्चभिः सह ॥९१५॥

एको बटुर्दर्भकुशाग्रपाणिर्वने वने सिञ्चति बालचूतान् ।
आम्राश्च सिक्ताः, पितरश्च तृप्ता, **एका क्रिया द्व्यर्थकरी प्रसिद्धा॥**

नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि ।
कुशाग्रेणैव संस्पृष्टः प्राप्तकाले न जीवति ॥९१७॥

अर्जुनस्य प्रतिज्ञे द्वे, न दैन्यं, न पलायनम् ।
आयू रक्षति मर्माणि, आयुरन्नं प्रयच्छति ॥९१८॥

अंतःप्रतप्तमरुसैकतदह्यमानमूलस्य चंपकतरोः क विकासचिन्ता ।
प्रायो भवत्यनुचितस्थितिदेशभाजां श्रेयःस्वजीवपरिपालनमेव ॥९१९॥

व्यासादीन् कविपुंगवाननुचितैर्वाक्यैः सलीलं हसन्
उच्चैर्जल्प निमील्य लोचनयुगं श्लोकान् सगर्वं पठन् ।
काव्यं धिक्कुरु यत्परैर्विरचितं, स्पर्धस्व सार्धं बुधै-
र्यद्यभ्यर्थयसे श्रुतेन रहितः पांडित्यमासुं बलात् ॥९२०॥

समये पयोधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि बाले, न हि न हि सखि पिच्छिलः पन्थाः ॥९२१॥

यत्पादाः शिरसा न केन विधृताः पृथ्वीभृतां मध्यतः
तस्मिन् भास्वति राहुणा कवलिते लोकत्रयीचक्षुषि ।
खद्योतैः स्फुरितं, तमोभिरुदितं, तारभिरुज्जृंभितं
घुकैरुत्थितमाः किमत्र करवै, किं केन नो चेष्टितम् ॥९२२॥

मारात्परः शूरतरो न कश्चित्पराभवः स्त्रीहरणान्न चान्यः ।
तथापि नाब्धिं प्रविवेश रामो, बबंध सेतुं विजयी सहिष्णुः॥९२३॥

नक्षत्राणि बहूनि सन्ति परितः पूर्णोदयान्यम्बरे

तैः किं शान्तिमुपैति दीर्घतिमिरं, किं वार्धिरुज्जृंभते ।
किं स्यादार्तचकोरपारणविधिर्भ्रातःसुधादीधिते
तन्नूनं भुवनैकतापशमनः श्लाघ्यस्तवैषोदयः॥५२४॥
मानरहितः, स्वकार्ये साधनसुपटुर्महाजलधिवासी ।
श्रुत्येकदृष्टगोत्रः, प्रियभक्तश्चित्तपावनो भगवान् ॥५२५॥
विस्मयः सर्वथा हेयः, प्रत्यूहः सर्वकर्मणाम् ।
तस्माद्विस्मयमुत्सृज्य साध्यसिद्धिर्विधीयताम् ॥५२६॥
त्यजेदेकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे, आत्मार्थे पृथिवीं त्यजेत् ॥५२७॥
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ।
पुनर्दाराः, पुनर्वित्तं, न शरीरं पुनः पुनः ॥५२८॥
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।
तस्मात्कर्तव्यप्रयत्नेन ऋणं कृत्वा घृतं पिबेत् ॥५२९॥
कर्ता कारयिता चैव प्रेषको ह्यनुमोदकः ।
सुकृते दुष्कृते चैव चत्वारः समभागिनः ॥५३०॥
अर्चकस्य तपोयोगादर्चनस्यातिशायनात् ।
अभिरूप्याच्च मूर्तीनां देवः सान्निध्यमृच्छति ॥५३१॥
सर्वदा स्वहितमाचरणीयं, किं करिष्यति जनो बहुजल्पः ।
सर्वलोकपरितोषकारको नास्ति तत्र खलु कश्चिदुपायः ॥५३२॥
चिता चिन्ता समा ह्युक्ता बिन्दुमात्रं विशेषतः ।
सजीवं दहते चिन्ता, निर्जीवं दहते चिता ॥५३३॥

चतुरः सखि मे भर्ता, यल्लिखति च तत्परो न वाचयति ।
तस्मादप्यधिको मे, **स्वयमपि लिखितं स्वयं न वाचयति** ॥
तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति ॥५३५॥
कुण्डे काष्ठे रथे मञ्चे नौकायां पशुवृक्षयोः ।
तृणौघजनसंघाते स्पर्शदोषो न विद्यते ॥५३६॥
खादन्न गच्छामि, हसन्न जल्पे, गतं न शोचामि, कृतं न मन्ये ।
द्वाभ्यां तृतीयो न भवामि राजन्, किं कारणं, भोज, भवामि मूर्खः॥
अपात्रे पात्रताबुद्धिः, पात्रे बुद्धिरपात्रता ।
ऋणानुबन्धरूपेण दातुरुत्पद्यते मतिः ॥५३८॥
न कश्चित्कस्यचिन्मित्रं, न कश्चित्कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥५३९॥
धर्मं प्रसंगादपि नाचरन्ति, पापं प्रयत्नेन समाचरन्ति ।
आश्चर्यमेतद्धि मनुष्यलोकेऽमृतं परित्यज्य विषं विबन्ति ॥५४०॥
पुण्यस्य फलमिच्छन्ति, पुण्यं नेच्छन्ति मानवाः ।
न पापफलमिच्छन्ति, पापं कुर्वन्ति यत्नतः ॥५४१॥
छायां प्रकुर्वन्ति नमन्ति पुष्पैः फलानि यच्छन्ति तटद्रुमा ये ।
उन्मूल्य तानेव नदी प्रयाति, तरङ्गिणां किं प्रतिपन्नमस्ति ॥५४२॥
रामप्रव्रजनं वनं, निवसनं पाण्डोः सुतानां वने
वृष्णीनां निधनं, नलस्य नृपते राज्यात्परिभ्रंशनम् ।
सौदासं तदवस्थमर्जुनवधं सञ्चिन्त्य लङ्केश्वरं

दृष्ट्वा राज्यकृते विडम्बनगतं तस्मान्न तद्वाञ्छयेत् ॥९४३॥
यदर्थं भ्रातरः पुत्रा अपि वाञ्छन्ति ये निजाः ।
वधं राज्यकृते राज्ञां, तद्राज्यं दूरतस्त्यजेत् ॥९४४॥
पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोऽपि प्रश्नान्मुक्तो द्विजः पुरा ॥९४५॥
साक्षीकृत्य महेश्वरं सगिरिजं स्वर्गापगायास्तटे
प्राणानां शरणं कलेवरधनं न्यासीकृतं सज्जनैः ।
भूयो भूरितरैरुपायनितरैः संप्रार्थ्यमाना तु या
दातुं नेच्छति सा, नु किं मुनिवरैर्धन्येति काशीर्यते ॥९४६॥
यदि वा याति गोविन्दो मथुरातः पुनः, सखि ।
राधाया नयनद्वन्द्वे राधानामविपर्ययः ॥९४७॥
शास्त्राण्यधीत्यापि भवन्ति मूर्खा, यस्तु क्रियावान्पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम् ॥९४८॥
अल्पाक्षररणणीयं यः कथयति निश्चितं स खलु वाग्मी ।
बहुवचनमल्पसारं यः कथयति विप्रलापी सः ॥९४९॥
अविज्ञातविशेषस्य सर्वतेजोऽपहारिणः ।
स्वामिनो निर्विवेकस्य तमसश्च किमन्तरम् ॥९५०॥
वेषं न विश्वसेत्प्राज्ञो, वेषो दोषाय जायते ।
रावणो भिक्षुरूपेण जहार जनकात्मजाम् ॥९५१॥
अग्रतश्चतुरो वेदाः, पृष्ठतः सशरं धनुः ।
इदं ब्राह्ममिदं क्षात्रं शापादपि शरादपि ॥९५२॥

एकं वस्तु द्विधा कर्तुं बहवः सन्ति धन्विनः ।
धन्वी स मार एवैको द्वयोरेकं करोति यः ॥९५३॥
द्वारं खड्गिभिरावृतं बहिरपि प्रस्विन्नगण्डैर्गजै-
रन्तः कञ्चुकिभिः स्फुरन्मणिधरैरासादिता भूमयः ।
आक्रान्तं महिषीभिरेव शयनं त्वद्विद्विषां मंदिरे
राजन् सैव चिरंतनप्रणयिनी शून्यऽपि राज्यस्थितिः ॥९५४॥
अत्यन्तमतिमेधावी त्रयाणामेकमश्नुते ।
अल्पायुषो दरिद्रो वा ह्यनपत्यो न संशयः ॥९५५॥
अङ्केषु शून्यविन्यासाद्बुद्धिः स्यात्तु दशाधिका ।
तस्माज्ज्ञेया विशेषेण अङ्कानां वामतो गतिः ॥९५६॥
बिडौजाः पुरा पृष्टवानब्जयोनिं धरामण्डले सारभूतं किमस्ति ।
चतुर्भिर्मुखैरुत्तरं तेन दत्तं तमाखुस्तमाखुस्तमाखुस्तमाखुः ॥९५७॥
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत् ।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥९५८॥
बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनम् ।
न छिन्द्यान्नखलोमानि दन्तैर्नोत्पाटयेन्नखान् ॥९५९॥
मनसैव कृतं पापं, न शरीरकृतं कृतम् ।
येनैवालिङ्गिता कान्ता तेनैवालिङ्गिता सुता ॥९६०॥
धृष्टपुष्टो भवेद्दादा, सुन्दरी बहिनी तथा ।
दन्तभग्नो भवेद्बाबा, आबा च गतभर्तृका ॥९६१॥
विद्यते कलहो यत्र गृहे नित्यमकारणः ।

तद्गृहं जीवितं वाञ्छन् **दूरतः परिवर्जयेत्** ॥५६२॥
खरं श्वानं, गजं मत्तं, रण्डां च बहुभाषिणीम् ।
कृष्णसर्पं, कुमित्रं च दूरतः परिवर्जयेत् ॥५६३॥
महानदीप्रतरणं, महापुरुषविग्रहम् ।
महाजनविरोधश्च, दूरतः परिवर्जयेत् ॥५६४॥
मण्डले मण्डलाकारे, रेखा वाजिनि ये जवे ।
सव्यापसव्ये द्विमुखो नकुलाधिष्ठितो हयः ॥५६५॥
किमंगारवद् गां खुरैः स्पर्शयन्तः, कुरंगा इवांगानि संकोचयन्तः ।
अटन्तो नटन्तो भटं तोषयन्तस्तुरंगाः सुरंगाः पुरं गाहयन्ति॥५६६॥
यावच्छकलितो वायुरेकी भवितुमर्हति ।
तावदेव तुरंगोऽयमाजगाम जगाम च ॥५६७॥
व्यापारान्तरमुत्सृज्य वीक्षमाणो वधूमुखम् ।
यो गृहेष्वेव निद्राति, दरिद्राति स दुर्मतिः ॥५६८॥
षड् दोषा पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥५६९॥
आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्सल्यम् ।
संतोषो भीरुत्वं **षड्व्याघाता महत्त्वस्य** ॥५७०॥
अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥५७१॥
को देशः कानि मित्राणि, कः कालः, कौ व्ययागमौ ।
कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥५७२॥

प्राप्य चलानधिकारान् शत्रुषु मित्रेषु बन्धुवर्गेषु ।
नापकृतं, नोपकृतं, न सत्कृतं, किं कृतं तेन ॥५७३॥
आज्ञा, कीर्तिः, पालनं सज्जनानां, दानं, भोगो, मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥५७४॥
अनुयातानेकजनः परपुरुषैरुह्यतेऽस्य निजदेहः ।
अधिकारस्थः पुरुषः शव इव न शृणोति वीक्षते कुमतिः ॥५७५॥
उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन इष्टं धर्मेण योजयेत् ॥५७६॥
रथः शरीरं पुरुषस्य, राजन्नात्मा, नियतेन्द्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तं कुशली सदश्वैर्दान्तैः सुखं याति रथीव धीरः ॥५७७॥
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥५७८॥
अव्याकरणमधीतं भिन्नद्रोण्या तरंगिणीतरणम् ।
भेषजमपथ्यसहितं त्रयमिदमकृतं वरं, न कृतम् ॥५७९॥
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो, न सुखं संशयात्मनः ॥५८०॥
करस्थमुदकं त्यक्त्वा घनस्भमभिवाच्छति ।
सिद्धमन्नं परित्यज्य भिक्षामटति दुर्मतिः ॥५८१॥
अयश्चणकचर्वणं फणिफणामणेः कर्षणं
करेणगिरितोलनं जलनिधेः पदा लङ्घनम् ।
प्रसुप्तहरिबोधनं निशितखड्गसंस्पर्शनं

कदाचिदखिलं भवेन्न च शठाद्धनस्यार्जनम् ॥९८२॥
गर्भस्थो हरते दुग्धं, जन्मतः स्नेहमाहरेत् ।
पश्चाद्धनविभागेन, नास्ति बन्धुसमो रिपुः ॥९८३॥
विपुलहृदयाभियोग्ये खिद्यति काव्ये जडो, न मौर्ख्ये स्वे ।
निन्दति कश्चिकिकारं प्रायः शुष्कस्तनी नारी ॥९८४॥
दुर्जनहुताशदग्धं काव्यसुवर्णं विशुद्धिमुपयाति ।
दर्शयितव्यं तस्मान्मत्सरिमनसः प्रयत्नेन ॥९८५॥
कतिचिदुद्धतनिर्भरमत्सराः, कतिचिदात्मवचःस्तुतिशालिनः ।
अहह, केऽपि निरक्षरकुक्षयस्तदिह संप्रति कं प्रति मे श्रमः॥९८६॥
किं तेन हेमगिरिणा रजताद्रिणा वा
यत्र स्थिता हि तरवस्तरवस्त एव ।
मन्यामहे मलयमेव, यदाश्रयेण
शाखोटनिम्बकुटजा अपि चन्दनाः स्युः ॥९८७॥
अयि बत गुरुगर्वं मास्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यन्तदीनं
स्वजनकममुनैव प्राणहानं करोषि ॥९८८॥
अयि त्यक्तास कस्तूरि पामरैः पङ्कशङ्कया !
अलं खेदेन, भूपालाः किं न सन्ति महीतले ॥९८९॥
आर्द्रापात्परतोऽप्यमी नृपतयः सर्वे समभ्यागताः
कन्येयं कलधौतकोमलरुचिः, कीर्तिश्च लाभः परः ।

नाकृष्टं, न च टङ्कितं, न नमितं, नोत्थापितं स्थानतः
केनापीदमहो महद्धनुरिदं, **निर्वीरमुर्वीतलम्** ॥९९०॥
बालोऽपि चोरः स्थविरोऽपि चोरः समागतः प्राघुणिकोऽपि चोरः ।
दिल्लीप्रदेशे मथुराप्रदेशे चोरं विना न प्रसवन्ति नार्यः ॥९९१॥
चतुरङ्गबलो राजा जगतीं वशमानयेत् ।
अहं पञ्चांगबलवानाकाशं वशमानये ॥९९२॥
कंधरां समपहाय कं धरां प्राप्य संयति जहास कस्यचित् ।
मां किलानमयतः स्वपूर्तये दुर्भराद्किमुदराद्वियोगतः ॥९९३॥
अस्य दग्धोदरस्यार्थे किं न कुर्वन्ति पण्डिताः ।
वानरीमिव वाग्देवीं नर्तयन्ति गृहे गृहे ॥९९४॥
शद्धशास्त्रमनधीत्य यः पुमान्वक्तुमिच्छति वचः सभान्तरे ।
बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥९९५॥
भ्रातः काञ्चनलेपगोपितबहिस्ताम्राकृते सर्वतो,
मा भैषीः कलशे, स्थिरो भव चिरं देवालयस्योपरि ।
ताम्रत्वं गतमेव, काञ्चनमयी कीर्तिः स्थिता तेऽधुना
नान्तस्तत्वविचारणप्रणयिनो लोका बहिर्बुद्धयः ॥९९६॥
रे रे रासभ वस्त्रभारवहनात्कुग्रासमश्नासि किं
राजाश्वावसथं प्रयाहि, चणकाभ्यूषान् सुखं भक्षय ।
सर्वान् पुच्छवतो हयानिति वदन्यत्राधिकारे स्थिता
राजा तैरुपदिष्टमेव मनुते सत्यं, तटस्थाः परे ॥९९७॥
ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयतां

स्वल्पं जल्प, बृहस्पते जडमते, नैषा सभा वज्रिणः ।
वीणां संहर नारद, स्तुतिकथालापैरलं तुंबरो,
सीतारल्लकभल्लभग्नहृदयः स्वस्थो न लंकेश्वरः ॥५९८॥
विद्वद्राजशिखामणे तुलयितुं धाता त्वदीयं यशः
कैलासं च निरीक्ष्य तत्र लघुतां निक्षिप्तवान् पूर्तये ।
उक्षापं तदुपर्युमासहचरं, तन्मूर्ध्नि गंगाजलं
तस्याग्रे फणिपुंगवं, तदुपरि स्फारं सुधादीधितिम् ॥५९९॥
मंदरेण मथितोऽसि न पापिन्, ग्रासितोऽसि तमसा न दुरात्मन् ।
त्वां शरेण शतधा परिनिन्ये जानकीमुखसमो यदि न स्याः॥६००॥
कः कौ के, कं कौ कान् हसति हसतो हसन्ति तन्वंग्याः ।
दृष्ट्वा पल्लवमधरः, पादौ पद्मे च, कोरकान्दन्ताः ॥६०१॥
वक्त्रं पूर्णशशी, सुधाऽधरलता, दन्ता मणिश्रेणयः
कान्तिः श्रीर्गमनं गजः, परिमलस्ते पारिजातद्रुमः ।
वाणी कामदुघा, कटाक्षलहरी तत्काऽकूटं विषं
मन्ये सुंदरि, हा श्रमाय मथितो मूढैः सुरैः सागरः ॥६०२॥
श्रिया गेहे, मयाऽरण्ये, रामस्त्यक्तस्त्वया पथि ।
बत मुद्रे, पुरंध्रीणां प्रत्ययं कः करिष्यति ॥६०३॥
चापाकृति धनुर्मासे, मकरे कुण्डलाकृति ।
कुम्भे शीतमशीतं वा, मीने शीतनिवारणम् ॥६०४॥
सुप्रातं दिनमद्य नः परिणतं साफल्यमद्यायुषः
कर्माण्यद्य शिवंकराणि सुमहानद्योत्सवो नेत्रयोः ।

कार्पण्येन चिराय संप्रति कृतं प्रास्थानिकं मंगलं
यज्जागर्ति भवन्मुखेन्दुरधुना दिष्ट्या दृशोरग्रतः ॥६०५॥
साहजिकरूपवत्या भवति भवत्या विभूषणं भारः ।
सर्वांगसौरभिण्या दमनकवल्याः किमालि कुसुमेन ॥६०७॥
इन्दु निन्दति चक्रवाकयुगलं, भासां निधिं कौशिकः
स्वादुक्षीरमरोचकी, सुकृतिनं पापी, जडः पण्डितम् ।
त्यक्तं सर्वजनैः खलः, कटुवचा ग्राम्यः पुमान्नागरं
कः पैतामहगोलकेऽत्र निखिलैः सम्मानितो वर्तते ॥६०८॥
कस्यापि कोऽप्यतिशयोऽस्ति स तेन लोके
ख्यातिं प्रयाति न हि सर्वविदस्तु सर्वे ।
किं केतकी फलति किं पनसः सुपुष्पः
किं नागवल्यपि च पुष्पफलैरुपेता ॥६०९॥
तुष्टे सति न लाभाय, रुष्टे नाशाय नैव च ।
प्रज्वालितानि शण्पाणि नाङ्गाराय न भस्मने ॥६१०॥
आत्मपक्षं परित्यज्य परपक्षेषु यो रतः ।
स परैर्हन्यते मूढो नीलवर्णश्शृगालवत् ॥६११॥
यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः ।
तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ॥६१२॥
अप्युन्नतपदारूढः पूज्यान्नैवावमानयेत् ।
नहुषः शक्रतां प्राप्य च्युतोऽगस्त्यावमाननात् ॥६१३॥
विप्रास्मिन्नगरे महान्कथयतां, तालद्रुमाणां गणः;

को दाता? रजको ददाति वसनं प्रातर्गृहीत्वा निशि ।
को दक्षः परदारवित्तहरणे? सर्वोऽपि दक्षो जनः;
कस्माज्जीवसि, हे सखे? विषकृमिन्यायेन जीवाम्यहम् ॥६१४॥
ददतु ददतु गालीर्गालिवन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ।
जगति विदितमेतद्दीयते विद्यमानं
न हि शशविषाणं कोऽपि कस्मै ददाति ॥६१५॥
धनेषु जीवितव्येषु स्त्रीषु चाहारकर्मसु ।
अतृप्ताः प्राणिनः सर्वे याता, यास्यन्ति, यान्ति च ॥६१६॥
मात्रा स्वस्रा दुहित्रा वा नैकशय्यासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥६१७॥
वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥६१८॥
धर्मार्थकाममोक्षाणां यस्मै कोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥६१९॥
अन्तस्तिमिरनाशाय शाद्भबोधो निरर्थकः ।
न नश्यति तमो नाम कृतया दीपवार्तया ॥६२०॥
कल्पवृक्षोऽपि कालेन भवेद्यदि फलप्रदः ।
को विशेषस्तदा तस्य वन्यैरन्यमहीरुहैः ॥६२१॥
अप्युत्तमात्प्रलपतो बालाच्च परिजल्पतः ।
सर्वतो सारमादद्यादश्मभ्य इव काञ्चनम् ॥६२२॥

नान्यद्गीतात्प्रियं लोके देवानामपि दृश्यते ।
शुष्कस्नायुस्वराल्हादात् त्र्यक्षं जग्राह रावणः ॥६२३॥
साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ॥६२४॥
काव्यं सुधा रसज्ञानां, कामिनां कामिनी सुधा ।
धनं सुधा सलोभानां, शान्तिः सन्यासिनां सुधा ॥६२५॥
दधि मधुरं, मधु मधुरं, द्राक्षा मधुरा, सुधापि मधुरैव ।
तस्य तदेव हि मधुरं, यस्य मनो यत्र संलग्नम् ॥६२६॥
ज्येष्ठो भ्राता पिता चैव यश्च विद्यां प्रयच्छति ।
त्रयस्ते पितरो ज्ञेया धर्मे पथि हि वर्तिनः ॥६२७॥
जनिता चोपनेता च यस्तु विद्यां प्रयच्छति ।
अन्नदाता भयत्राता **पञ्चैते पितरः स्मृताः** ॥६२८॥
श्वश्रूश्च मातृतुल्या स्यात्तथा ज्येष्ठा स्वसापि च ।
तथा मातुः सपत्नी च, **ज्येष्ठो भ्राता पितुः समः** ॥६२९॥
राजपत्नी, गुरोः पत्नी, मित्रपत्नी तथैव च ।
पत्नीमाता, स्वस्य माता, **पञ्चैता मातरः स्मृताः** ॥६३०॥
सामदाने दण्डभेदावित्युपायचतुष्टयम् ।
हस्त्यश्वरथपादान्तं सेनाङ्गं स्याच्चतुष्टयम् ॥६३१॥
स्थानभ्रष्टा न शोभन्ते, दन्ताः केशा नखा नराः ।
स्थानभ्रष्टाः सुशोभन्ते, सिंहाः, सत्पुरुषा, गजाः ॥६३२॥
अन्यैः साकं विरोधेन वयं पञ्चोत्तरं शतम् ।

परस्परविरोधेन वयं पञ्च च ते शतम् ॥६३३॥
पितृपूर्वार्जिता भूमिर्दरिद्रापि सुखावहा ।
अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ॥६३४॥
यद्ददाति यदश्नाति तदेव धनिनां धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥६३५॥
गतः स कालो, यत्रासन् देवाः रावानुवर्तिनः ।
दशानन दशां पश्य, तरन्ति दशदोऽम्भसि ॥६३६॥
अजायुद्धमृषिश्राद्धं, **प्रभाते मेघडम्बरम्** ।
दम्पत्योः कलहश्चैव परिणामे न किञ्चन ॥६३७॥
परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥६३८॥
काकस्य कति वा दन्ता, मेषस्याण्डं कियत्पलम् ।
गर्दभे कति रोमाणि, व्यर्थैषा तु विचारणा ॥६३९॥
यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान्स्वान्हितान्गुरून् ।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि ॥६४०॥
वरं बुद्धिर्न सा विद्या, विद्याया बुद्धिरुत्तमा ।
बुद्धिहीना विनश्यन्ति, यथा ते सिंहकारकाः ॥६४१॥
गगनं गगनाकारं, सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥६४२॥
लेखनी सर्ववर्णेषु विधिना निर्मिता पुरा ।
नवाङ्गुलप्रमाणेन, **अधिकस्याधिकं फलम्** ॥६४३॥

सौवर्णानि सरोजानि निर्मातुं सन्ति शिल्पिनः ।
तत्र सौरभनिर्माणे चतुरश्चतुराननः ॥६४४॥
सच्छिद्रनिकटे वासो न कर्तव्यः कदाचन ।
घटी पिबति पानीयं ताड्यते झल्लरी यथा ॥६४५॥
मुखवर्जे तु गौः शुद्धा, मार्जारश्चाश्रमे शुचिः ।
शय्या, भार्या, शिशुर्वस्त्रमुपवीतं कमण्डलुः ॥६४६॥
मत्स्यादयोऽपि जानन्ति नीरक्षीरविवेचनम् ।
प्रसिद्धमेव हंसस्य, यशः पुण्यैरवाप्यते ॥६४७॥
शुकवद्वाषणं कुर्यात्, बकवद्ध्यानमाचरेत् ।
अजवच्चर्वणं कुर्याद्गजवत्स्नानमाचरेत् ॥६४८॥
मानुष्ये सति दुर्लभा पुरुषता, पुंस्त्वे पुनर्विप्रता
विप्रत्वे बहुविद्यतातिगुणता, विद्यावतोऽर्थज्ञता ।
अर्थज्ञस्य विचित्रवाक्पटुता, तत्रापि लोकज्ञता
लोकज्ञस्य समस्तशास्त्रविदुषो धर्मे मतिर्दुर्लभा ॥६४९॥
दशधा पापकर्माणि कायवाङ् मानसैस्त्यजेत् ।
काले हितं मितं ब्रूयादविसंवादि पेशलम् ॥६५०॥
राकारोच्चारमात्रेण मुखान्निर्याति पातकम् ।
पुनः प्रवेशसंदेहान्मकारस्तत्कपाटवत् ॥६५१॥
उद्घाटित नवद्वारे पञ्जरे विहगोऽनिलः ।
यत्तिष्ठत्ति तदाश्चर्यं, प्रयाणे विस्मयः कुतः ॥६५२॥
दाने दयायां दाक्षिण्ये ज्ञाने तपसि विक्रमे ।

विस्मयः कोऽत्र कर्तव्यो, **बहुरत्ना वसुन्धरा** ॥६९३॥
व्यंकटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किञ्चन ।
व्यङ्कटेशसमो देवो **न भूतो न भविष्यति** ॥६९४॥
द्वाविमौ पुरुषौ लोके न भूतौ न भविष्यतः ।
प्रार्थितं यश्च कुरुते, यश्च नार्थयते परम् ॥६९५॥
धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥६९६॥
अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वर्याद् भ्रश्यते हि सः ॥६९७॥
आत्मनात्मानमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः ।
आत्मा ह्येवात्मनो बन्धुरात्मैव रिपुरात्मनः ॥६९८॥
बन्धुरात्मात्मनस्तस्य येनैवात्मात्मना जितः ।
स एव नियतो बन्धुः, स एव नियतो रिपुः ॥६९९॥
जलान्तश्चन्द्रचपलं जीवनं खलु देहिनाम् ।
तथाविधमिति ज्ञात्वा शश्वत्कल्याणमाचरेत् ॥७००॥
पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः ।
पिता, मातात्मिरात्मा च, गुरुश्च भरतर्षभ ॥७०१॥
शुचिरास्तिक्यपूतात्मा पूजयेद्देवताः सदा ।
देवतावद्गुरुजनमात्मवच्च सुहृज्जनम् ।७०२॥
अनिन्दा परकृत्येषु, स्वधर्मपरिपालनम् ।
कृपणेषु दयालुत्वं, सर्वत्र मधुरा गिरः ॥७०३॥

देहबुद्ध्या तु दासोऽहं, जीवबुद्ध्या त्वदंशकः ।
तत्त्वबुद्ध्या त्वमेवाहमिति मे निश्चिता मतिः ॥७०४॥
अनुकूले विधौ देयं, यतः पूरयिता हरिः ।
प्रतिकूले विधौ देयं, यतः सर्वं हरिष्यति ॥७०५॥
यदा यदा मुनेः किंचिद्विजानामि तदा तदा ।
मतिरायाति नौद्धत्यं **तेन जीवाम्यनामयः** ॥७०६॥
यथाकालमुपायातावर्थानर्थौ समौ मम ।
हस्ताविव शरीरस्थौ, तेन जीवाम्यनामयः ॥७०७॥
अहस्तानि सहस्तानामपदानि चतुष्पदाम् ।
फल्गूनि तत्र महतां, **जीवो जीवस्य जीवनम्** ॥७०८॥
न गच्छेतां पितापुत्रौ, न गच्छेत्सोदरद्वयम् ।
नवनार्यौ न गच्छेयुर्न गच्छेद्ब्राह्मणत्रयम् ॥७०९॥
पथ्ये सति गदार्तस्य किमौषधिनिषेवणम् ।
पथ्येऽसति गदार्तस्य किमौषधिनिषेवणम् ॥७१०॥
बालसख्यित्वमकारणहास्यं स्त्रीषु विवादमसज्जनसेवा ।
गर्दभयानमसंस्कृतवाणी षड्भिर्नरा लघुतामुपयाति ॥७११॥
मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥७१२॥
आकारेणैव चतुरास्तर्कयन्ति परेङ्गितम् ।
गर्भस्थं केतकीपुष्पमामोदेनैव षट्पदाः ॥७१३॥
आदावायुः परीक्षेत, पश्चाल्लक्षणमुत्तमम् ।

आयुर्हीननराणां च लक्षणैः किं प्रयोजनम् ॥६७४॥

इतो भ्रष्टस्ततो भ्रष्टः परमेकान्तिवेषभाक् ।
न संसारसुख तस्य, नैव मुक्तिसुखं तथा ॥६७५॥

उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः ।
बाल्ये वैधव्यदग्धानां कुलस्त्रीणां कुचाविव ॥६७६॥

जटिलो मुण्डी लुंचितकेशः काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि न पश्यति मूढ **उदरनिमित्तं बहुकृतवेषः** ॥६७७॥

गुरवो बहवः सन्ति शिष्यवित्तापहारकाः ।
दुर्लभः स गुरुर्लोके शिष्यचित्तापहारकः ॥६७८॥

देशाटनं पण्डितमित्रता च वाराङ्गनाराजसभाप्रवेशः ।
अनेकशास्त्राणि विलोकितानि चातुर्यमूलानि भवन्ति पञ्च ॥६७९॥

रिक्तपाणिर्न पश्येत राजानं देवतां गुरुम् ।
दैवज्ञं पुत्रकं मित्रं फलेन फलमादिशेत् ॥६८०॥

अग्निहोत्रं गृहं क्षेत्रं सखाभार्यासुतं शिशुम् ।
रिक्तपाणिर्न पश्येत राजानं देवतां गुरुम् ॥६८१॥

आज्ञाभङ्गो नरेन्द्राणां, विप्राणां मानखण्डनम् ।
पृथक्शय्या च नारीणामशस्त्रवध उच्यते ॥६८२॥

तुष्यन्ति भोजनैर्विप्रा, मयूरा घनगर्जितैः ।
साधवः परसन्तोषैः, खलाः परविपत्तिषु ॥६८३॥

अल्पतोयश्चलत्कुम्भी, अल्पदुग्धाश्च धेनवः ।
अल्पविद्यो महागर्वी, कुरूपी बहुचेष्टितः ॥६८४॥

सम्पूर्णकुम्भो न करोति शब्दमर्धो घटो घोषमुपैति नूनं ।
विद्वान्कुलीनो न करोति गर्वं, गुणैर्विहीना बहु जल्पयन्ति ॥६८५॥

क्रोधो हि शत्रुः प्रथमं नराणां देहस्थितो देहविनाशनाय ।
यथा स्थितः काष्ठगतो हि वन्हिः, स एव वन्हिर्दहते शरीरम्॥६८६॥

जलनिधौ जननं, धवलं वपुर्मुररिपोरपि पाणितले स्थितिः ।
इति समस्तगुणान्वित शंख भोः कुटिलता हृदये न निवारिता॥६८७॥

केयूरा न विभूषयन्ति पुरुषं, हारा न चन्द्रोज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते किल भूषणानि सततं वाग्भूषणं भूषणम् ॥६८८॥

पात्रे त्यागी, गुणे रागी, संविभागी च बन्धुषु ।
शास्त्रे बोद्धा, रणे योद्धा, **पुरुषः पंचलक्षणः** ॥६८९॥

अश्वस्य लक्षणं वेगो, मत्तो मातंगलक्षणम् ।
चातुर्यं लक्षणं नार्यो, उद्योगः पुरुषलक्षणम् ॥६९०॥

ज्ञानिनोऽपि यदा स्वार्थं निश्चित्य ध्यानमास्थिताः ।
सत्वाः संसारदुःखार्ताः कं यान्ति शरणं तदा ॥६९१॥

गुणी गुणं वेत्ति, न वेत्ति निर्गुणो,
बली बलं वेत्ति, न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः ॥६९२॥

स दीक्षितो, यः सकलं यदीक्षते,

स **पण्डितो** यः करणैरखण्डितः ।
स **तापसो** यः परतापकर्षणः,
स **धार्मिको** यः, परमर्म न स्पृशेत् ॥६९३॥
किं कोकिलस्य विरुतेन गते वसन्ते,
किं कातरस्य बहुशस्त्रपरिग्रहेण ।
मित्रेण किं व्यसनकालपराङ्मुखेन
किं जीवितेन पुरुषस्य निरक्षरेण ॥६९४॥
गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते ।
असंजाताकिणस्कन्धः सुखं स्वपिति गौर्गलिः ॥६९५॥
न च पश्यति जन्मान्धः, कामान्धो नैव पश्यति ।
न पश्यति मदोन्मत्तो त्वर्थी, दोषान्न पश्यति ॥६९६॥
क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्णविभवः ।
जराजीर्णैरंगैर्नट इव वलीमण्डिततनु—
नरः संसारान्ते विशति यमराजीजवनिकाम् ॥६९७॥
भार्गवेण हता माता, एकजायाश्च पाण्डवाः ॥
परदाररतः कृष्णो, **न देवचरितं चरेत्** ॥६९८॥
गन्धः सुवर्णे, फलमिक्षुदण्डे, नाकारि पुष्पं खलु चन्दनेषु ।
विद्वान्धनाढ्यो न तु दीर्घजीवी धातुः पुरा कोऽपि न बुद्धिदोऽभूत् **॥९९**
दिवा निरीक्ष्य वक्तव्यं रात्रौ नैव च नैव च ।
संचरन्ति महाधूर्ता, वटे वररुचिर्यथा ॥७००॥

अर्थातुराणां न गुरुर्न बंधुः, कामातुराणां न भयं न लज्जा ।
चिन्तातुराणां न सुखं न निद्रा, क्षुधातुराणां न रुचिर्न वेला॥७०१॥
मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ॥७०२॥
वक्तारः किं करिष्यन्ति, श्रोता यत्र न विद्यते ।
नग्नक्षपणके देशे रजकः किं करिष्यति ॥७०३॥
मणिं वहति पादाग्रे, काचः शिरसि धार्यते ।
क्रयविक्रयवेलायां काचः काचो, मणिर्मणिः ॥७०४॥
उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम् ।
सोत्साहस्यास्ति लोकेऽस्मिन्न किंचिदपि दुर्लभम् ॥७०५॥
एकेनापि सुधीरेण सोत्साहेन रणं प्रति ।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात् ॥७०६॥
आयुर्वित्तं गृहच्छिद्रं रहस्यं मन्त्रमौषधम् ।
तपो दानावमानौ च नव गोप्यानि कारयेत् ॥७०७॥
शुचि भूमिगतं तोयं, शुचिर्नारी पतिव्रता ।
शुचिः क्षेमकरो राजा, संतोषी ब्राह्मणः शुचिः ॥७०८॥
सर्वं परवशे दुःखं, सर्वमात्मवशे सुखम ।
इति मत्वा तु राजेन्द्र स्वयंदासास्तपस्विनः ॥७०९॥
हसता लभ्यते नारी, रुदता लभ्यते धनम् ।
पठता लभ्यते विद्या, त्यजता लभ्यते यशः ॥७१०॥
यस्य वर्णस्य यो राजा स वर्णः सुखमेधते ।

जामदग्न्येन रामेण ब्राह्मणा भूभुजः कृताः ॥७११॥

प्रभुर्विवेकी, प्रमदा सुशीला, तुरंगमः शस्त्रनिपातधीरः ।
विद्वान् विरागी, धनिकः प्रदाता, भूमंडलस्याभरणानि पञ्च॥७१२॥

पुष्पादनंतरं स्यात्फलं लतायां प्रसिद्धमिति लोके ।
चित्रं कनकलतेयं पुष्पोद्गमतः फलद्वयं पूर्वम् ॥७१३॥

गुरुजननयने पिधेहि निद्रे, त्वरितमिहास्तमुपैहि पद्मबन्धो ।
इति वदति मनोभवाभितप्ता चिरसमयागतवल्लभा मृगाक्षी ॥७१४॥

सौमित्रिर्ब्रुवति, बिभीषणाय लंकां
देहि त्वं, भुवनपते, विनैव कोशम् ।
एतस्मिन्रघुपतिराह वाक्यमेत-
द्विक्रीते करिणि किमंकुशे विवादः ॥७१५॥

कान्तारे घनतिमिरे भुजङ्गमेभ्यो,
नो भीता, न च गणिता महापगापि ।
किं बाले वहसि भयं मदंगसंगाद्,
विक्रीते करिणि किमंकुशे विवादः ॥७१६॥

मिथिला हसत्ययोध्यां त्वं सखि परपुरुषानुरक्ताऽसि
मिथिलां परिहसति च सा, त्वं खलु जनकानुरक्तासि ॥७१७॥

न सन्ध्यां सन्धत्ते नियमितनिमाजं न कुरुते ।
न वा मोजीबन्धं कलयति न वा सौनतविधिम् ॥७१८॥
न रोजां जानीते व्रतमपि हरेर्नैव कुरुते ।
न काशीं मक्कां वा, शिव शिव न हिन्दुर्न यवनः ॥७१९॥

गृह्णात्येष रिपोः शिरः, प्रविजनं कर्षत्यसौ वाजिनं
धृत्वा चर्म धनुः प्रयाति पुरतो संग्रामभूमावपि ।
द्यूतं चौर्यकथां तथा च शपथं कुर्यान्न वामः करो
दानानुद्यमतां विलोक्य विधिना शौचाधिकारी कृतः ॥७२०॥

वैष्णवाश्च पिशाचाश्च मत्कुणाश्च पिपीलिकाः ।
भस्मदर्शनमात्रेण पलायन्ते दिशो दश ॥७२१॥

हस्तादपि न दातव्यं, गृहादपि न दीयते ।
परोपकरणार्थाय **वचने का दरिद्रता** ॥७२२॥

विषं कुपठिता विद्या, विषं व्याधिरनौषधः ।
विषं व्याधिर्दरिद्रस्य, **वृद्धस्य तरुणी विषम्** ॥७२३॥

ब्रह्महत्यादिपापानां कथंचिन्निष्कृतिर्भवेत् ।
विश्वासघातकानां तु निष्कृतिर्नास्ति कुत्रचित् ॥७२४॥

वीणेव श्रोत्रहीनस्य, लोलाक्षीव विचक्षुषः ।
व्यसोः कुसुममालेव, **विद्या स्तब्धस्य निष्फला** ॥७२५॥

विवाहो जन्ममरणं यदा यत्र च येन च ।
त्रयः कालकृताः पाशाः शक्यन्ते न निवर्तितुम् ॥७२६॥

अर्थाहरणकौशल्यं किं स्तुमः शास्त्रवादिनाम् ।
अव्ययेभ्योऽपि ये चार्थान्निष्कास्यन्ति ह्यनेकशः ॥७२७॥

पुत्र इत्येव पितरि, कन्यकेत्येव मातरि
गर्भप्रश्नेषु कथयन् **दैवज्ञो विनयी भवेत्** ॥७२८॥

आयुःप्रश्ने दीर्घमायुर्वाच्यं मौहूर्तिकैर्द्विजैः ।

जीवन्तो बहु मन्यन्ते, मृताः प्रक्ष्यन्ति कं पुनः ॥७२९॥

यत्रात्मीयो जनो नास्ति भेदस्तत्र न विद्यते ।

कुठारैर्दण्डनिर्मुक्तैर्भिद्यन्ते, तरवः कथम् ॥७३०॥

जीवन्नेव मृतोऽसौ यस्य जनो वीक्ष्य वदनमन्योन्यं ।
कृतमुखभङ्गो दूरात्करोति निर्देशमङ्गुल्या ॥७३१॥

मलिनैरलकैरेतैः शुक्लत्वं प्रकटीकृतम् ।
तद्दोषादेव निर्याता वदनाद्रदनावलिः ॥७३२॥

दारेषु किंचित्स्वजनेषु किंचिद्वोढ्यं वयस्येषु सुतेषु किंचित् ।
युक्तं न वा युक्तमिदं विचिन्त्य वदेद्विपश्चिन्महतोऽनुरोधात् ॥७३३॥

शिला बाला जाता चरणरजसा यत्कुलशिशोः
स एवायं सूर्यः सपदि निजपादैर्गिरिशिलाम् ।
स्पृशन्भूयो भूयो न खलु कुरुते कामपि वधूं
कुले कस्मिंश्चिन्न्यः प्रभवति नरः श्लाघ्यमहिमा ॥७३४॥

यथा चतुर्भिः कनकं परीक्ष्यते निर्घर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा ७३५

मौने मौनी, गुणिनि गुणवान्पण्डिते पण्डितोऽसौ
दीने दीनः, सुखिनि सुखवान्भोगिनि प्राप्तभोगः ।
मूर्खे मूर्खो, युवतिषु युवा, वाग्मिषु प्रौढवाग्मी
धन्यः कोऽपि त्रिभुवनविजयी योऽवधूतेऽवधूतः ॥७३६॥

काचं मणिं कांचनमेकसूत्रे मुग्धा निबध्नन्ति किमत्र चित्रम् ।

विचारवान्पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह ॥

यास्यति जलधरसमयस्तव च समृद्धिर्लघीयसी भविता ।
तटिनि, तटद्रुमपातनपातकमेकं चिरस्थायि ॥७३८॥

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य ।
तावद्वितीयं समुपस्थितं मे, **छिद्रेष्वनर्था बहुलीभवन्ति** ॥७३९॥

सन्तानवाहीन्यपि मानुषाणां दुःखानि सद्बन्धुवियोगजानि ।
दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव संप्लवन्ते ॥७४०॥

संचारिणी काञ्चनयष्टिरेव, विद्युल्लता वा पतिता नभस्तः ।
घृतस्य धारा पतिता न जाने दिवं गता वाथ भुवं गता वा॥७४१॥

आनन्दतांडवपुरे द्रविडस्य गेहे चित्रं वसिष्ठवनितासममाज्यपात्रम् ।
विद्युल्लतेव परिनृत्यति तत्र दर्वी, धारां विलोकयति योगबलेन सिद्धः॥

अमी तिलास्तैलिक नूनमद्य स्नेहादवस्थां भवतोपनीताः ।
द्वेषोऽभविष्यद्यदमीषु नित्यं तदाद्यवस्थां किमवाकरिष्यः ॥७४३॥

हे हेमकार परदुःखविचारमूढ
किं मां मुहुः क्षिपसि वारशतानि वन्हौ ।
दग्धे पुनर्मयि भवन्ति गुणातिरेका
लाभः परं खलु मुखे तव भस्मपातः ॥७४४॥

संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥७४५॥

लौकिकानां हि साधूनामर्थं वागनुधावति ।

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥७४६॥
यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥७४७॥
सर्वथा व्यवहर्तव्यं कुतोऽद्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥७४८॥
ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्तु ते किमपि तान्प्रति नैष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥७४९॥
सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदया
राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्वदा ।
काले सन्ततवर्षिणो जलमुचः सन्तु स्थिराः पुण्यतो
मोदन्तां धनबद्धबान्धवसुहृद्गोष्ठीप्रमोदा जनाः ॥७५०॥

शुभं भवतु ॥

EXPLANATORY NOTES.

(मराठी व इंग्रजी टीपा.)

Page 1. **पटान्तलग्नतृणकं**–एखाद्या वस्त्राच्या दशेला चिकटलेल्या गवताच्या काडीप्रमाणें, like a blade of grass sticking to the fringe of a garment. **पाथेयं परिगृह्य कार्मुकवरं**–आपलें उत्तम धनुष्य हीच काय ती शिदोरी घेऊन, taking his excellent bow as the only provision for the journey. **स्वाधीनः.....विक्रियां**–जो शिवाचें धनुष्य मोडण्याचेवेळीं बिलकुल घाबरला नाहीं, who remained master of himself and did not become nervous at the time of breaking .Shiva's bow. **अन्यथा कर्तुम्**–अगदीं बदलून टाकण्याला, to alter, to change. **आभीरकन्या**–गोपकन्या the daughters of the herdsmen in Gokul. **रसज्ञा**–जिव्हा, the tongue. **सपदि**–एका क्षणांत, in an instant.

Page 2. **शब्दातीतं**–अवर्णनीय, beyond the reach of words, indescribable. **तत्त्वावबोधं**–आत्मज्ञान, a thorough knowledge of the real nature of the human soul. **को विधिः, को निषेध**–धर्माज्ञा अथवा निषेध याची काय किंमत, what of a religious command or a prohibitive rule? **विशोकं**–आनंदानें, joyfully. **अन्तःकरणे रमन्तः**–आत्मतत्वाचा विचार करण्यांत गुंग अथवा रममाण झालेले, taking delight in thinking of the real nature of the human soul. **कौपीनवन्तः**–लंगोटी हेंच काय तें वस्त्र ज्यांच्याजवळ आहे असे, having or wearing

only a strip of cloth over their privities. **भेकः**-बेडूक, a frog. **व्यालः**-सर्प, a snake. **इति वेदान्तडिण्डिमः**-वेदान्त-रूपी नगारा अशा तऱ्हेनें द्वाही फिरवीत आहे, ओरडून सांगत आहे, thus beats the drum in the form of the Vedant philosophy. **किल्बिषं**-पाप, Sin. **शिवाय विष्णुरूपाय**-विष्णूचें रूप घेतलें आहे ज्यानें अशा शंकराला नमस्कार असो, a bow to Shankar who has taken the form of Vishnu.

Page 3. **आर्जवं समचित्तता**-मनाचा सरळपणा सर्वांना सारखें मानणें हाच होय, straight forwardness or uprightness is equanimity. **सर्वभूतेषु येनैकं भावमव्ययमीक्षते**-सर्वांमध्यें अव्यय व अविभक्त असा एकच भाव (ब्रह्म) भरून राहिला आहे असें ज्या ज्ञानामुळें समजतें, the knowledge by which man sees that there is one changeless life in all that lives. **शतं विहाय**-दुसरीं शंभर कामें बाजूला ठेवून, keeping aside hundred other duties. **भेषजे**-औषधावर, in a medicine. **भावना**-भक्ति, विश्वास, faith, belief.

Page 4. **तेन जीवाम्यनामयः**-ह्मणून अथवा त्याचेयागानें मी आनंदांत आहे, on that account I lead a happy life. **प्रस्ताव-यज्ञः**-ज्यांत प्रत्येकाला प्रश्न विचारितां येतात अशा तऱ्हेचा वादविवादरूपी यज्ञ, a sacrifice in the form of conversation in which every interlocutor takes a part. **नायं प्रयाति विकृतिं**-हा बिघडत नाहीं, is not spoilt, does not ferment. **रुचिमेति**-रुचि उत्पन्न करितो creates relish. **सुभाषितरसोऽन्यरसातिशायी**-विनोद-पर भाषण (अथवा श्लोक) रूपी रस अथवा पेय इतर सर्व रसापेक्षां श्रेष्ठ आहे, the juice in the form of a witty saying is superior to all other juices or drinks.

Page 5. **अज्ञाञ्ज्ञानवतो.....समर्थो भवेत्**-सुभाषिताचे योगानें कोणीही अज्ञ अथवा ज्ञानी मनुष्याला वश करूं शकेल, by means of it (a witty saying) any body will be able to win over an ignorant or even a learned man. **प्रथमे-चार** आश्रमांपैकीं पहिल्या (ब्रह्मचर्य) आश्रमामध्यें, in the first of the four stages of life, *i. e.* in Brahmacharya. **सुवर्णपुष्पितां**-सोन्यानें अथवा संपत्तीनें भरलेली, abounding or rich in gold. **अमेध्यादपि**-विष्ठेपासून देखील, even from excrement. **वितरति**-देतो, gives, imparts.

Page 6. **प्रभवति**-समर्थ असतो, is able. **गुणान्तरं व्रजति**-अधिक प्रभाव करून दाखवितें, attains to greater excellence. **शिल्पं**-कौशल्य skill. **पाकाकुलाभिः**-स्वैंयपाक करण्यांत गढून गेलेल्या, busily engaged in cooking. **समिद्धोऽग्निः**-चांगला पेटलेला अग्नि, fire lighted up or blazed. **बुधा मनः सर्वविकारहेतुम्**-शहाणे लोक सर्व विकारांचें मूळ जें मन त्याचें दमन करितात, the wise subdue the mind, the cause of all sorts of temptations.

Page 7. **मोक्कारमुद्दिश्य हिनस्ति सिंहः**-सिंह बाण सोडणाऱ्यावर झेंप घालितो, the lion strikes or bounds aiming at the archer. **ध्यानाधिरूढो बकः**-बक नेहमीं ध्यान करीत असतो, ह्मणजे डोळे झांकून उभा असतो, the crane is engaged in profound meditation. **ज्ञानप्रधानं तपः**-ज्ञानाशिवाय तपश्चरण व्यर्थ आहे, religious austerities are of no use without knowledge. **परुषाक्षराभिर्गर्भिः**-कडक शब्दांनीं, by harsh or abusive words **अलब्धशाणोत्कषणा मणयः**-साणेवर घासून साफ न केलेलीं रत्नें, jewels

which have not been whetted on a whet stone. **डिण्डिमः**–नगारा, drum. **हस्तिपकाहतः**–महातानें वाजविलेला, beaten by an elephant driver. **धुरंधराः**–(चिखलांत रुतलेल्या हत्तींना बाहेर काढलांना) जुंपण्याला योग्य, बाहेर काढण्याला समर्थ, fit to be harnessed (at the time of taking out the elephants sunk into mud) **सुरभयति मुखं कुठारस्य**–कुऱ्हाडीचें तोंड सुवासित करतो, makes the edge of the axe fragrant.

Page 8. **भरक्रान्ता**–भारानें शिणलेली, tired out under the weight (of animals etc.) **धरा**–पृथ्वी, the earth. **व्यजनं**–पंखा, a fan. **चारुवंशसमुद्भवं**–चांगल्या कुलांत जन्मलेला अथवा चांगल्या कळकाचा केलेला, born of a good family or made of a beautiful bamboo **वृत्तिः**–वागणूक, conduct. **मलिनम्**–पापकर्म, a sinful act. **असुभङ्गेऽपि**–प्राण जाण्याची वेळ आली तरी, even when there is danger to life. **असुकरम्**–करण्यास कठीण, न करणें, not stooping to commit. **विपद्युच्चैः स्थेयम्**–विपत्तींमध्यें देखील चांगल्या तऱ्हेनें वागणें, leading a noble life even in adversity. **सतां केनोद्दिष्टं .....व्रतमिदम्**–तरवारीच्या धारेवर निजण्याप्रमाणें कठीण असें हें व्रत (राहणी) सज्जन लोकांना कोणी शिकविलें, who taught this mode of life, as difficult as lying on the sharp edge of a sword, to the good? **असारे**–निरुपयोगी, निःसार, useless, worthless. **आमोदं मृदेव धत्ते**–फुलांचा वास मातीलाच लागतो, clay only takes the fragrance of flowers.

Page 9. **तीक्ष्णांशोः**–सूर्याच्या, of the sun. **रथ्याम्बु**–रस्त्यावरील पाणी, the water on a road. **न भवति पुनरुक्तम्**–

बदलत नाहीं, आपलें बोलणें मागें घेत नाहींत, do not retract their words. **केनाञ्जितानि नयनानि**–डोळ्यांत कोणी काजळ घातलें, who anointed their eyes? **रुचिरांगरुहान्**–(मोरांचे) पिसारे चित्रविचित्र कोणी केले, who made the feathers(of peacocks) variegated? **उत्पलेषु**–कमलांवर, on lotuses. **अग्रिमपाश्चात्ययोः सूच्याः**–सुईच्या पुढल्या व मागच्या भागाचें, the front and hinder parts of a needle. **अनुकुरुतः**–अनुकरण करतात, सारखे असतात, imitate, resemble. **मुद्रणं विदधाति**–बंद करितो, closes. **विग्रहीतः**–(श्लोकपक्षीं), विग्रह केला असतां, (सज्जनपक्षीं) भांडण केलें तरी (1) when dissolved, (2) when opposed. **पदाक्रान्तः**–(१) पदें पाडली असतां (२) पादाक्रांत केलें तरी, (1) when divided into parts, (2) even when ruined.

Page 10. **पापे रतिं मा कृथाः**–पापकर्मांवर आसक्ति धरूं नको, fix not your attachment on sinful acts. **विद्विषोऽप्यनुनय**–आपल्या शत्रूशीं देखील सख्य कर, conciliate even your enemies. **पद्माकरं**–कमलांचा समूह, an assemblage of lotuses. **विकचं करोति**–विकसित करितो, causes to expand, opens. **नाभ्यर्थितो**–कोणीही प्रार्थना केली नसली तरी, though not requested. **स्वयं कृताभियोगाः**–आपण होऊन खटपट करितात, exert themselves of their own accord. **प्लवङ्गैः**–वानरांनीं, by monkeys. **श्रीखण्डखण्डैः**–चंदनाचीं झाडें घेऊन, with multitudes of sandal trees. **विभूतयः**–संपत्ति, wealth, riches. **आत्मना ख्याताः**–आपल्या स्वतःच्या गुणांनीं प्रसिद्ध होतात, become celebrated of themselves, *i. e.*, by their own merits.

Page 11. **धीरः**–शहाणा मनुष्य, a wise man. **विलसति**–करमणूक करतो, amuses himself. **गहनानि**–संकटें, diffi-

culties. **नीचैः प्रणतानि**–खालीं वाकलेलें, नम्र झालेलें, stooping low. **क्रियासिद्धि..... .....नोपकरणे**–थोर लोकांचे बाबतींत, एखादें काम तडीला नेणें हें त्यांचे हिमतीवर अवलंबून असतें, इतर साधनांवर त्यांची भिस्त नसते, in the case of the great, the complete attainment of an object depends upon their inherent power and not upon the helping instruments. **दुःस्थं वपुरिदम्**–शरीर पहावें तेंही बारीक, of weak body. **पाथोधिं-क्षीरलाघवला**, the milk ocean. **यदकृत कराम्भोजकुहरे**–ज्या अर्थी आचमन करून टाकिले, as (the sage Agastya) took into the hollow of his hand and drank up. **विपक्षः**–शत्रु, enemy. **श्रीकण्ठः**–शंकर, the God Shiva. **भुजगयमिताः सप्ततुरगाः**–रथाला अडनीड सात घोडे असून ते बांधण्याला सळसळीत अशा सापांचा उपयोग केलेला, his chariot is drawn by seven (an odd number) horses, serpents being used as ropes to yoke them.

Page 12. **अङ्गारः**–कोळसा, charcoal. **दुःसन्धानः**–एकी करण्याला कठीण, difficult to be reconciled. **कौशिकानां दृष्टी रूपं प्रतिपद्यते**–घुबडांच्या डोळ्यांना दिसते, owls can perceive forms (things). **विशिखव्यालयोरन्त्यवर्णाभ्यां**–विशिख (बाण) व व्याल (साप) यांचे अन्त्यवर्ण अनुक्रमें ख व ल यांचे योगानें, (the word खल is) formed of the final letters of विशिख (an arrow) and व्याल (a snake). **घूणकीटः**–वाळवी, a kind of insect found in timber. **जीमूतः**–मेघ, clouds. **हेतु**–कारण cause. **किं वचनीयमेतत्**–हें सांगावयाला पाहिजे काय? need this be told?

